दिसम्बर २०२० तः
जनवरी २०२१ पर्यन्तम्
मार्गशीर्ष-शुक्ल-पञ्चमीतः-
माघ-कृष्ण तृतीया पर्यन्तम्
(शकाब्दः १९४२)

RNI
DELSAN/2013/50379

ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-८ संयुक्ताङ्कः-५-६

दिल्ली संस्कृत अकादमी
दिल्ली सर्वकारः

सम्पादकः
डॉ.अरुण कुमार झा
सचिवः

ISSN-2347-1565

मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

**दिसम्बर २०२० तः जनवरी २०२१ पर्यन्तम्**
**वर्षम्-८ संयुक्ताङ्कः-५-६**

(शकाब्दः १९४२)
(मार्गशीर्ष-शुक्ल-पञ्चमीतः-माघ-कृष्ण तृतीया पर्यन्तम्)

**सम्पादकः**
**डॉ. अरुण कुमार झा**
**सचिवः**

**सहायकसम्पादकः**
**प्रद्युम्नचन्द्रः**

**पत्रिका-परामर्शकाः**
डॉ. आशुतोषदयाल माथुरः
डॉ. पंकजा घई
डॉ. पूर्वा भारद्वाजः
डॉ. धनञ्जयमणि त्रिपाठी

| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| | सम्पादकीयम् | | III |
| | **कविता** | | |
| १. | पुत्र! पठेस्तवं संस्कृतभाषाम् | डॉ. रामकिशोरमिश्रः | १ |
| २. | परशुराम चरित्रम् | ,, | २ |
| ३. | सरस्वतीवन्दनम् | डॉ. कैलाशनाथः द्विवेदी | ४ |
| ४. | गवां प्रयोजनानि | डॉ. गदाधरः त्रिपाठी | ७ |
| ५. | बाल-कविता | डॉ. जीतराम भट्टः | ८ |
| ६. | रम्यं विश्वम् | श्री ऋषिराजः जानी | १० |
| ७. | चायगाथा | डॉ. सीतानाथ आचार्यः | ११ |
| ८. | विष्णुस्तोत्रम् | डॉ. केशवरामः शर्मा | १३ |
| | **कथा** | | |
| ९. | स्वभावः स्वाभिमानश्च | श्री प्रहलादः | १५ |
| १०. | घटः | कृष्णदत्तः 'शास्त्री' शर्मा | १६ |
| ११. | सुविधाशुल्कम् | ,, | १८ |
| १२. | अहङ्काररहरणम् | डॉ. शारदा रमेशः गाडगे | २० |
| १३. | स्वभावो दुरतिक्रमः | ,, | २२ |
| १४. | आत्मविश्वासः | रेखा कपूरः | २३ |
| १५. | न वाच्चम् एतादृशं वचनम् | डॉ. अंजू बाला | २४ |
| १६. | विद्या धनं सर्वधनं प्रधानम् | श्री प्रमोदकुमारः शर्मा | २६ |
| | **लेख** | | |
| १७. | संस्कृते वैश्विक-विषाणुज-संक्रामक रोगविमर्शः | डॉ. कैलाशनाथः द्विवेदी | २९ |
| | | | ३५ |
| १८. | न दैन्यं न पलायनम् | डॉ. राधेश्याम गंगवारः | ३८ |
| १९. | संस्कृतशास्त्रेषु विज्ञानतत्त्वानि | डॉ. जीतराम भट्टः | |

**दिल्ली संस्कृत अकादमी**
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
**ई-पत्रिका**

प्रकाशकः
सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं0-5, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005
दूरभाषः - 011-23635592, 23637798

**सदस्यताशुल्कम्**

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | २५ रूप्यकाणि |
| वार्षिकम् | : | २५० रूप्यकाणि |

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

**शुल्कप्रदानप्रकारः**

बैंकधनादेशः ( डी0डी0 ), डाकधनादेशः ( मनिआर्डर ) अथवा सी0टी0सी0 चैक माध्यमेन ( दिल्लीसंस्कृतअकादमीपक्षे )

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

अयि सुरवाणीसमुपासकाः!

अस्मिन् जगति मानवसभ्यताया आदितो वर्तमानपरिदृश्यमाने लोके यत्किमपि विद्यमानं वर्तते प्रवर्तमानं वा स्यात् तेषां समेषां मूलं संस्कृतमिति ध्रुवं सत्यमित्यत्र न सन्देहलेशावसरः।

भारतीयसंस्कृतिपरिज्ञानं संस्कृताधीनम्। यतो हि संस्कृते एव संस्कृतिस्वरूपं समुल्लसितं वर्तते। अस्माकं सांस्कृतिकनिधयः संस्कृते एव सुरक्षिताः सन्ति। अतस्तज्ज्ञानार्थं संस्कृताध्ययनं नितान्तमावश्यकम्। स्वकीया संस्कृतिर्यदि न सुज्ञाता स्यात् परिरक्षिता च न भवेत् तर्हि मानवजीवनस्य सुसाफल्यं न स्यात्। अतो भारतीयसंस्कृतेः परिज्ञानार्थं सांस्कृतिकनिधीनाञ्च परिरक्षणार्थं यथा पूर्वं तथैवाधुनापि संस्कृताध्ययनमावश्यकमिति धिया अकादमीपक्षतः बालानां कृते या मासिकी पत्रिका प्रकाश्यते तस्याः पत्रिकाया अयं नूतनः संयुक्ताङ्कः प्रकाश्यते इति ज्ञात्वा मोमुद्यते मे मनः।

संस्कृतं न केवलमेका भाषा अपितु इदं सर्वासाम् विद्यानां बीजभूतेति वक्तुं शक्यते। अस्य ज्ञानं विना भारतवर्षस्य भौगोलिकमैतिहासिकमाध्यात्मिकं व्यावहारिकञ्च तत्त्वज्ञानं सम्यगाहर्तुं न शक्यते। इयं भाषा भारतवर्षस्यामूल्यनिधीनां भाण्डागारो विद्यते। वेदाः, तन्त्राणि, उपनिषदः, अष्टादशपुराणानि, अष्टादशैवोपपुराणानि, षड्दर्शनशास्त्राणि, धर्मशास्त्राणि काव्यग्रन्थाश्चास्यां संस्कृतभाषायामुपलभ्यन्ते। एतदतिरिक्तं व्याकरण-ज्योतिषप्रभृतिषड्वेदाङ्ग-आयुर्वेद-योग-कर्मकाण्ड-स्मृति-नीति-राजनीति-नाट्यशास्त्र-ललितकला-समाजशास्त्र-अर्थशास्त्र-भूगोल-मनोविज्ञानसङ्गीतेत्यादीनां मूलं संस्कृतभाषायाम् एवास्ति। वस्तुतो ज्ञानविज्ञानयोः न किमप्येतादृशमङ्गं यन्नोपलभ्यते संस्कृते। अतएव साम्प्रतं संस्कृतविद्यामधिकृत्य विदेशेष्वपि अध्ययनाध्यापनशोधकार्याणि बाहुल्येन भवन्ति।

एवम्भूतस्य संस्कृतनिहितज्ञान-विज्ञानयोः बाल्यादेव प्रचार-प्रसाराय संस्कृतानुरागिणां प्रमोदाय चेयं पत्रिका भवितेति शम्।

**माघकृष्णसप्तमी**
**शकाब्दः १९४२**

**भावत्कः**
**डॉ. अरुण कुमार झा**
**सचिवः**

# पुत्र! पठेस्त्वं संस्कृतभाषाम्

-डॉ. रामकिशोरमिश्रः

संस्कृतव्याकरणज्ञानाय प्रणम पाणिनिं वैयाकरणम्।
शब्दशास्त्रकारान् तत्पूर्वान् व्याडिं शिष्यैः पूजितचरणम्।
शाकल्यस्फोटायनौ च तौ ययोविधिभिः प्राप्तविकासाम्।
पुत्र! पठेस्त्वं संस्कृतभाषाम्॥ १॥

पदं सुप्तिङन्तं विज्ञाय त्वं गच्छेरर्चितुं शङ्करम्।
स धारयति भक्तान् सुरक्षितुं दुष्टेभ्यो रूपं भयङ्करम्।
यस्य डमरुनादादृषिपाणिनिरचितचतुर्दशसूत्रविकासाम्।
वत्स! पठेस्त्वं संस्कृतभाषाम् ॥ २॥

अइउण्-ऋलृक्-एओङ्-ऐऔच्' इत्थं स्वरसूत्राणि
'इको यणचि' सूत्रं सुध्युपास्यतः सूत्रे व्यवहर।
सन्धिसमासरूपविज्ञानैः कल्पितभारतभूसुरग्रासाम्।
पुत्र! पठेस्त्वं संस्कृतभाषाम् ॥ ३॥

'एङः पदान्तादति' हे हरेऽव, भवं भवानीपतिमर्चत्वम्।
पाणिनिकृतं व्याकरणादिशास्त्रं रे पुत्र! स्वमनसा पठ त्वम्।
विद्योत्तमायास्त्वम् 'आद्गुणोऽसि' स्वमातरं न कुरु निराशाम्।
वत्स! पठेस्त्वं संस्कृतभाषाम् ॥ ४ ॥

'झलां जशोऽन्ते' जगदीश्वरस्ते 'विसर्जनीयस्य स' पातु विद्याम्।
सकलो माभूद्वदने शकलो वाणीं हि कुरु व्याकरणेन गद्याम्।
पठ 'वृद्धिरेचि' त्वं सर्वदैवम् 'अकः सवर्णे दीर्घ'स्तदाशाम्।
पुत्र! पठेस्त्वं संस्कृतभाषाम् ॥ ५ ॥

जनकश्चिनोति त्वां 'स्तोः श्चुनाश्चुः' संस्कृतज्ञं कर्तुं कविं वा।
त्वां काशीनृपमन्त्रिणमीहे वाञ्छसि 'मोऽनुस्वारः' किं वा॥
आशासे त्वं ज्ञात्वा सन्धिं पूरयितासि तनूज! ममाऽऽशाम्।
वत्स! पठेस्त्वं संस्कृतभाषाम् ॥६॥

'रोऽरि' 'ढ्रलोपे दीर्घोऽण'स्तवां सूत्रे साधयतो नीरोगम्।
कवयो निरङ्कुशाः 'ससजुषोः रु'र्हशि च कुर्वते विद्याभोगम्॥
'वाशरि' साशश्शब्दान् ज्ञात्वा कुरु सुत! धातुरूपजिज्ञासाम्।
पुत्र! पठेस्त्वं संस्कृतभाषाम् ॥ ७॥

# परशुरामचरितम्

श्रीपरशुराम आसीत्स जमदग्नेरात्मजः।
रेणुका जननी यस्य ऋचीकस्य पौत्रो हि सः॥१॥

स ऋचीको भृगोः सूनुर्यस्य पत्नी सत्यवती।
सा च गाधेर्दुहिताऽऽसीत्कान्यकुब्जमहीपतेः॥२॥

सत्यवत्या भ्राता नाऽऽसीद् ऋचीकस्तया प्रार्थितः।
मातुर्मम भवेत्पुत्र इत्युपाय कृपां कुरु॥ ३॥

तेन तस्यै चुरु दत्तौ सुतमन्त्राऽभियन्त्रितौ।
प्रथमचुरु तोयं त्वं पिबेर्येन स्यान्ते सुतः॥ ४ ॥

द्वितीयं चुरुं ते माता पिबेद् येन स्यात्तत्सुतः।
परमभूत्सुतामात्रोश्चुरुपाने विपर्ययः॥ ५॥

सत्यवत्या जमदग्निर्विश्वरथो गाधेः सुतः।
विश्वरथो ब्रह्मतेजः सम्पन्नोऽभूत्तपस्यया॥ ६॥

ततो विश्वरथः सोऽभूद् विश्वामित्रः स विश्रुतः।
जमदग्निः क्षत्रतेजोयुक्तोऽभवत्स्वजन्मना ॥ ७॥

स परशुरामं मातुः शिरश्छेत्तुं समादिशत्।
रामो मातुः शिरश्छित्त्वा स आदेशमपालयत् ।।८।।

छिन्नं शिरो रेणुकाया दृष्ट्वा जमदग्निस्ततः।
प्रसन्नो भूत्वा स्वपुत्रं वरं याचितुमुक्तवान् ।।९।।

स मातरं जीवयितुं रामो वरमयाचत।
ततो जमदग्निः पुत्र-जननीं तामजीवयत्।।१०।।

कार्तवीर्यः कामधेनुं जमदग्निमयाचत।
निषेधं श्रुत्वा तेनर्षिः स शस्त्रेण संहारितः।।११।।

जननीविलापं श्रुत्वा तेन कार्तवीर्यो हतः।
पितुर्हत्यया क्रुद्धेन रामेण प्रतिज्ञा कृता।।१२।।

एकविंशतिवारं स हैहयवंशक्षत्रियान्।
परशुना हत्वा पृथ्वीं तद्विहीनां करिष्यति।।१३।।

ततः परशुना तेन हैहयक्षत्रिया हताः ।
परशुधारणाद् रामः, स परशुरामोऽभवत्।।१४।।

-२९५/१४ पट्टीरामपुरम्,
खेकड़ा-२५०१०१ ( बागपतम् )
उत्तर प्रदेशः

# सरस्वतीस्तवनम्

-डॉ. कैलाशनाथः द्विवेदी

नवगतिमतिदात्री ज्ञानगंगा-विधात्री
स्वररससरितायां सर्वदा भासमाना।
भव-विभवविभूतिर्भव्यभावैः समृद्धा
विलसतु वरदेयं वल्लकीं वादयन्ती ॥१॥

स्वभरतभुवि दृष्टः कीदृगातंकवादः,
प्रतिदिनामिह हिंसा-ताण्डवं वर्धमानः।
शयमतु रणभीतिं शान्ति-सौहार्दभावः,
वितरतु वरदानं शारदा ज्ञानदात्री ॥२॥

इह सुकविजनानां गौरवं चौव लुप्तम्,
नहि कविरचनायां दृश्यते क्वापि कान्तिः।
हर सुकविजनानां काव्यगाथां विलुप्तापम्।
उदयतु कविसूर्योऽनल्पकाव्याम्बरेऽपि ॥३॥

विकसतु सुरवाणी सर्वथा ज्ञानसिद्धैः।
सरसगुणयेतुयं भातु साहित्यरूपे।
शमयतु परितापं भारती भव्यभावैः
विभवमयमिदं स्यात् भारतं भा-रतं वै ॥४॥

वयमिह मतिमन्दाः ज्ञान-विज्ञानशून्याः
स्वरगुणरसहीना मानवा दोषपूर्णाः।
हर जनपरितापं शारदे सत्वरं त्वं,
कुरु कविछवियुक्तं भारतं विश्वमध्ये ॥५॥

न कुरु न कुरु कोपं ज्ञानलोपं मयि त्वं ,
हर हर मम बुद्धेर्जाड्यदोषं विकारम् ।
अतिविमलमतिः स्यात् शारदे सेवमाने,

अमलकमलनेत्रां, वेदवाणीविलासाम् ,
श्रुतिसुदमनोज्ञां, मंजुवीणाकरस्थाम् ।
प्रणवजपरतेभ्यो नादमन्त्रप्रदात्रीम् ,
स्वरनवनिधिसारां, शारदां त्वां नमामि ॥७॥

ऋषिमुनिजनसाध्यां सर्वसिद्धैः प्रणम्याम्,
विमलमतिमनोज्ञां ज्ञानपुंजेन रम्याम् ।
नवरसगुणहृद्यां दोषदूरां च दक्षाम् ,
प्रणमति मतिमन्दः शारदां सारदात्रीम् ॥ ८ ॥

सकलसुरगणानां सिद्धिभूतां सुसाध्याम्,
नवमतिगतिदात्री ज्ञान-विज्ञानधात्रीम् ।
श्रुतिविभववविलासां मन्दहास्यां ललामाम्,
दुरितजनदुरत्यां शारदां त्वां नमामि ॥९॥

विमलहृदयमध्ये निर्मले साधुकण्ठे,
अतिशुचिरसनायां सर्वदा लास्यमानाम् ।
हरिगुणगणगाने गौरवं वर्धयन्तीम् ,
सुकविजननमस्यां शारदां त्वां भजामि ॥१०॥

क्व कविविमलकण्ठः क्व भ्रमन् भ्रान्तचित्तः ,
कलियुगमलकूटे कुत्र वासो भवेत् तव ?
विमलहृदयमेवं स्यात् सुकण्ठेन सार्धम् ,
निवसतु मम कण्ठे शारदा सारदेयम् ॥११॥

जगति जडजनानां ज्ञान-विज्ञानशून्यं,
कुमतिकुगतियुक्तं कुत्सितं भ्रान्तचित्तम्।
सुमतिसुगतिदानं देहि हे शारदे त्वं,
प्रणमति तव भक्तस्त्वामयं देवि नित्यम् ॥१२॥

निखिलभुवनगीता गीत-छन्दः स्वरेषु,
हिमहिमकरहीनौ ते सिताङ्गस्य कान्तेः।
सरसिजलिपिवीणाहंसमालाः हि धन्याः,
विपुलकलुषपूर्णो देवि दूरान्नमामि ॥१३॥

सकलकविकुलानां देवताराध्यनीया,
कुमतिजडजनानां याऽस्ति बुद्धिप्रदात्री
धनबलरहितनामाश्रयस्यैकमूर्त्तिः,
वितरति वरदानं किं न वागीश्वरीयम् ॥१४॥

विचरसि विमलाभे त्वं मरालस्य पृष्ठे,
वितरसि वरदानं शुद्धबुद्धेर्निधानम्।
निवससि कमनीये काव्यकुञ्जे कवीनां,
प्रणमति तव दासः दिव्यदेवीं विधात्रीम् ॥१५॥

शिवां पद्मां मायां सरसिजगतां वैभवमयीम्
मराले शोभन्तीं सुगतिसुखदां पुण्यपदवीम्।
वरां वीणावाद्यां मुनिजनमुदां कीर्तिसदनाम्
गिरांदेवी वन्दे विधिहरिहरैर्नित्यभजिताम् ॥१६॥

हंसस्थितां मनोहरां, मायां विवुधवन्दिताम्।
वन्देऽहं वरदां वाणीं, वीणापुस्तकधारिणीम् ॥१७॥

भजे भक्ताश्रयां सर्वां, सर्वशोकनिवारिणीम्
शारदां शिवकारिणी, विघ्नवारिधितारिणीम् ॥१८॥

भक्तभयहरां भव्यां, भजेऽहं भगवती भवाम्।
विकासिनी, शुद्धबुद्धेः शान्तिरूपां सरस्वतीम् ॥१९॥

वाग्विभवप्रदां पूज्यां, पापपुञ्जविनाशिनीम्।
सुकविजनसाध्यां तां, नतोऽहं हंसवाहिनीम् ॥२०॥

-पूर्व प्राचार्यः,
'कुसुमकुलायः, सूर्यनगरम्,
अजीतमल (औरैया) उ.प्र -२०६१२१

# गवां प्रयोजनानि

-डॉ. गदाधरः त्रिपाठी

भाग्यवन्तो मनुष्याश्च मनुष्येभ्यः सर्वं हि यत्।
फलश्चैव च दुग्धश्च मनुष्यायैव हि निर्मितम् ॥ १॥
हरितैः शुष्कतृणैश्चैव वै पशूनां भवति पालनम्।
वृषभाः कर्षन्ति क्षेत्राणि गोमहिष्योर्दुग्धं तथा ॥ २॥
करुणा यथा भवति मातरि हि
गोजातिषु च तथा नु वै।
मातृक्षीरं यथा पीत्वा
पीत्वा गोदुग्धं तथा ॥ ३॥
गोमयेन च दुग्धेनाज्येन वै दध्ना तथा
पावनं पञ्चगव्यं हि गोमूत्रेण सर्वदा ॥ ४॥
कीटाणवो विनश्यन्ति खलु पवित्रं सदनं तथा
उपचारः कर्कटरोगस्य गोमूत्रेण कल्पितः ॥ ५॥
देवा वसन्ति देहे तु पुराणेषु निरूपितम् ।
गोदानं महत् पुण्यं देशेऽस्मिञ्च स्वीकृतम् ॥ ६॥
गोमयेन तु दुग्धेन गोमूत्रेण तथैव च वै।
समर्था भवितुमर्हन्ति वै कृषकाः ग्रामजीवने ॥ ७॥
दौर्भाग्याद् यन्त्रैर्हि कृषिकार्यमधुना भवति।
कृषका निर्धना जाता उपेक्षा गवाञ्च वै ॥ ८॥

-पुरानी बैलाई, मऊरानीपुरम्,
( झांसी )-२८४२०४
उत्तर प्रदेशः

# जीवाः

-डॉ. जीतराम भट्टः

बुद्धिमान् हस्ती चतुरः शृगालः
सरला च धेनुः चंचलश्च वानरः।
मधुरस्वरा कोकिला कर्कशश्च काकः
शुकश्चानुकर्ता तितीर्षुश्च वर्तकः।
तीव्रगामी अश्वः सुनयना च हरिणी
नृत्यप्रियः मयूरः हंसा मृदुनादिनी।
सिंह आक्रामकः भयंकर ऋक्षः
निद्रालुः शूकरः दिवान्धः उलूकः।
हिंसकस्तु व्याघ्रः वकः ध्यानमग्नः
असलश्च गण्डकः गर्दभैव गर्दभः।

# पिपीलिका

लघ्वी लघ्वी कृष्णा रक्ता।
कृत्वा लक्ष्यं पंक्तौ चलति।
दृष्ट्वा बाधां तदपि प्रयाति
तीर्त्वा रोधं त्वरितं धावति। पिपीलिका......................
दूरं गच्छति, गत्वा किञ्चिद्
विरमति स्थित्वा किञ्चित्तिष्ठति
धृत्वा भारं शीघ्रं गच्छति,
उपरि च गत्वा नीचैः पतति।। पिपीलिका.................
पुनः उत्थाय भारं वहति,
परस्परं सहयोगं चरति
संघे भूत्वा श्रमं चरित्वा,
कृत्वा कृत्वा सफला भवति। पिपीलिका..................

# वानरः

वानरः आयात् वानरः आयात्।
पुच्छं चालयन् वानरः आयात्॥
प्लवन् कूर्दन् वानरः आयात्।
मत्तः भूत्वा वानरः आयात्॥
नृत्यं कर्तुं वानरः आयात्।
हासयितुं नः वानरः आयात्॥
नायकः भूत्वा वानरः आयात्।
क्रीडकः भूत्वा वानरः आयात्।
वेषं धृत्वा वानरः आयात्
मोदयितुं नः वानरः आयात्॥
वानरः आयात् वानरः आयात्
पुच्छं चालयन् वानरः आयात्॥

- निदेशकः
डॉ. गोस्वामी गिरधारी लाल शास्त्री
प्राच्यविद्या प्रतिष्ठानम्,
दिल्ली सर्वकारः,
झण्डेवालानम्, नवदेहली-०५

# रम्यं विश्वम्

-ऋषिराजः जानी

आकाशे भास्करः आयाति
आतपरम्यं विश्वं भाति।
रम्यचन्द्रमाः निशिः आयाति
श्वेतज्योत्स्नया विश्वं स्नाति॥
तरुषु आयातो मधुमासः
दिशि दिशि प्रसरति मधुरसुवासः।
उदधिजले वेला सम्प्राप्ता
मया शुक्तयः प्राप्ताः शङ्खाः॥
आषाढे मेघा आयान्ति.....
रम्याणि शस्यैः क्षेत्राणि॥
गृहाङ्गणे आयाति कलापी
पिच्छं रम्यं तस्य ददाति।
दीपावलीयम् उत्सव-राज्ञी
अवकाशेन सदा आयाति........
सर्वगृहेषु विद्युत्-दीपाः
नववस्त्राणि मिष्टान्नानि.........
आयाति पृथ्व्यां महालक्ष्मीः ॥

- ८, राजतिलक बंगलोज, आबादनगरम्,
बोपल, अहमदाबादः-३८००३६

# चायगाथा

-डॉ. सीतानाथ आचार्यः

पायं पायं तव मधुरसं चाय हे चित्तकाम्यं
ध्यायं ध्यायं तव निरूपमं रूपवैचित्र्यचित्रम्।
स्मारं स्मारं तव मिलनजं सौख्यमद्वैतरूपं
गायं गायं तव गुणकथां प्रीतिमाप्नोमि दिव्याम् ॥ १॥

तारुण्यलावण्य तरङ्गिताङ्गा स्मितश्रिया मण्डितवक्त्रदेशा।
चित्तोष्णरागैरिव सौष्ण्ययन्ती ददाति चेत् चाय तवामृतं नः ॥ २ ॥

निजाधरोत्थामृतवच्च काचिद् ब्रवीति भूयश्च पिवेतिवाचम् ।
मुधायते तर्हि सुधाप्यमर्त्या दिव्याङ्गनाहस्तसरोजमुक्ता॥ ३ ॥

जगन्नियन्तापि महेश्वरः स्वयं समुद्रमन्थक्षणसम्भवात्मनः।
विषस्य पानात् सकृदेव तत्क्षणं सनीलकण्ठत्वमलंगतोऽभवत्॥ ४॥

तव प्रसादान् मनुजास्तु काममश्नन्त्यभीक्ष्णं विषकूटराशिम्।
हे चाय ते स्निग्धरसैः सहैव कञ्चिद्विकारं नहि प्राप्नुवन्ति॥ ५ ॥

उद्दीपनं त्वं कविकल्पनायाः सम्मूर्च्छनं त्वं किल रम्यगीतेः।
त्वं तूलिका चित्रकरस्य दक्षा वाग्मित्वशक्तिरपि वाग्मिलोके॥ ६॥

दीने गृहे दीनतमे च भाजने भग्नेऽथवा मृत्तिकयाऽथ निर्मिते।
म्लानस्वरूपो गतसौरभस्तथा स्थितोऽसि हे चाय विनोदहेतुक॥ ७॥

गेहे समृद्धे त हिरणमयेऽथवा रूप्यात्मके वोज्ज्वलरूपमोहके।
पात्रे सुगन्धैः सुरूपैश्च संयुतो विराजसे त्वं परितर्पकोत्तम ॥ ८॥

एवं स्वरूपैर्विविधैः पृथक् पृथक् स्थानेऽस्थितोऽपि सदृशीं प्रतृप्तताम्।
तनोषि हे चाय महीतलेऽखिल्मे चित्रं चरित्रं प्रतिभाति तावकम् ॥ ९॥

तवामृतस्वादरसेन वञ्चिताः सोमस्य वल्या रसमापीवन्तः।
धिग् वञ्चितास्ते ऋषयः श्रुतिज्ञाः यज्ञीयकृत्येषु कृतावधानाः ॥ १० ॥

ऋषेः कवित्वं श्रुतिवाचि लभ्यमकिञ्चिदित्येव विभाति चित्ते।
नह्यस्ति सामान्यतयापितस्यां गुणस्य ते कीर्तनमेव यस्मात् ॥ ११॥

अपामरैर्हन्त मनुष्यसञ्चरैः नक्तन्दिवं त्वं परिपूज्यसे मुदा।
समीक्ष्यसे त्वञ्च सुतृप्तिकाङ्क्षया चायेति तस्मात्तव नाम सार्थकम् ॥ १२॥

# विष्णुस्तोत्रम्

-डॉ. केशवरामः शर्मा

विष्णुस्त्वमेवासि जनस्य त्राता
दीनस्य बन्धुः सततं हि दान्तः।
शान्तः स्वरूपश्च शुभस्य कर्ता
मध्ये समुद्रेऽपि नृलोकचिन्तः॥

दुष्टा नु कंसादि दशानना वै
पापे रता कष्टकरा जनानाम्।
मत्स्यस्वरूपः कमठो वराहो।
त्राताऽसि लोकस्य नृदेहधारी॥

ब्रह्मादिमध्येऽपि विशेषपूज्यः
लोकस्य मान्यो हि शुभस्य दाता।
देवस्त्वमेवासि सदैव मान्यः
त्राणाय दीनस्य तथैव लग्नः॥

यज्ञप्रसूतां द्रुपदस्य पुत्रीं
पत्नीं प्रबुद्धां हि महारथीनाम्।
दुःशासनो दुष्टविवेकशून्यः
कर्तुं विवस्त्रां सदसि प्रयेते॥

भीष्मादिवीरैर्गुरुणा तथा च
नेत्राणि सर्वैर्हि निमीलितानि।
कृष्णास्सहायो न्वभवत् तदैव
दुष्टस्य हस्तो विरराम खिन्नः॥

दुर्योधनो धूर्तशलश्च योद्धा
कर्णस्तथा मूढविवेकहीनः।
दुष्टो यदा कष्टकरोऽस्ति भक्तम्।
आयाति देवो खलु रक्षणाय॥

नक्रो बलिष्ठो हि जलस्य मध्ये
भक्तस्त्वदीयो नु गजो विपन्नः।
एकेन पुष्पेण ददासि मोक्षं
देवो हि कः केशवतुल्यदाता?

भक्तोऽम्बरीषो व्रतशील ईड्यः
दृष्ट्वा विलम्बं कृतपारणोऽभूत्।
दुर्वाससः शाप इषुः प्रसिद्धः
कृत्यागता रक्षणहेतुरिष्टा॥

उत्पीडितोऽहं शरणागतो वै
भक्तिस्त्वदीया हि भवेत्प्रकाम्या
देव! कृपालुर्भव पार्श्वदाता
द्रष्टा नु सर्वैस्तव देव! शक्तिः॥

-बी-५९, वीथि सङ्ख्या -३
उत्तरी छज्जूपुरम्, देहली-११००९४

# स्वभावः स्वाभिमानश्च

**-प्रहलादः**

'न जाने एषः श्रेण्ठिः स्वस्य पादत्राणं सप्ताहमात्रे कथं त्रोटयति' चर्मरुः मंगू स्वगतमकथयत्।

तस्यापणस्याग्रे श्रेष्ठिनः रामलालस्यापणम् आसीत् यदा मंगू आदिनं कार्यं न प्राप्नोति तदा रामलालस्य भृत्यः सायङ्काले आगत्य पादत्राणं समीकरणाय ददाति स्म। मंगू पादत्राणं सीत्वा प्रददाति स्म। भृत्यस्तस्मै रूप्यकाणि दत्वागच्छति।

द्वि-त्रिदिवसानां पश्चात् पुनस्तथैव भवति। अद्यापि सायंकालोऽभूत् परञ्च मंगू किञ्चिदपि कार्यं न लब्धवान् एवं दृष्ट्वा श्रेष्ठिना पुनस्स्वस्य पादत्राणं त्रोटितम्।

अद्य तु श्रेष्ठिनं पृच्छाम्येव यत्कथं प्रतिदिनमित्थं करोति ''भो स्वामिन् कथं भवान् पादत्राणं स्वयमेव त्रोटयित्वा पुनः समीकरणाय मंगोः पार्श्वे प्रेषति।''

रामलालः पादत्राणं भृत्यस्य हस्ते स्थापितमन्यच्च विहसन् अवदत् ''भो! पश्य यद्दिने तस्य पार्श्वे कोऽपि ग्राहको नागच्छति तदाहं पादत्राणं त्रोटयामि। काममेषः मंगू निर्धनः स्यात् परञ्च स्वाभिमानी वर्तते, सः कृतस्य एव परिश्रमस्य धनं नयति। दानस्वरूपेण स न नयति। यद्यनेन व्याजेन तस्य स्वाभिमानः मम च स्वाभावः रक्ष्यते तर्हि का हानिः। तस्य नेत्रे जलासिक्ते आस्ताम्।

**-भगवती मातुः मन्दिरम्**
**भगवती कालोनी, ओ पी एस महाविद्यालयः**
**नेवलः, करनालः-१३२००१**

# घटः

-कृष्णदत्तः शर्मा ''शास्त्री''

कस्त्वं भोः! यो मां प्रमदापीनपयोधरपार्श्वं वाहुलतिकाबद्धकण्ठं निर्निमेषदृष्ट्या विलोकयन् आत्मविस्मृत इव पथि तिष्ठति? त्वं मां पश्यसि वा मामुद्वहन्तीमिमां श्यामाम्? तव विलोकनेन त्वेतत्प्रतीयते यत्त्वं मह्यभीर्ष्यसि। तवेर्ष्याकारणमप्यहं सम्यगवगच्छामि। तव मनोगतं ते चेष्टया सर्वं परिलक्ष्यते। अपि त ईर्ष्याकारणमेतदेव न-'कूपजलसंभृतोऽहं पीनकुचाम्बुजाक्षीग्रामललना कुचपार्श्व-बाहुलतिकबद्धकण्ठस्तद्कटिस्थः सरसोऽनयो ह्येतत्।'

बन्धो! त्वं न जानीषे, कियन्ति महाकष्टान्यनुभूयैवैतदवस्थापन्नोऽहम्। सुखं दुःखैर्विना न हि लभ्यते। यानि कष्टानि मयानुभूतानि तान्यसह्यानि। आमचिक्वणमृत्स्नाजलमिश्रणपिण्डीभूतम्, कुम्भकारचक्रारोहणम्, जलकिलन्नदोरक तीक्ष्णधारया शरीरकर्तनम्, प्रचण्डतपसहनम्, नीरसकाष्ठताडन-शतम्, अनलदाहम्, आदीनि तान्येव दुःखानि सन्ति यानि समुत्तीर्य मयैतत्स्पृहणीयं पदमाप्तम्। ब्रूहि! सर्वं सोढुं शक्तोऽसि? नो चेत्तर्हि किं प्रयोजनमत्रावस्थितेन? मा नामैषाऽथवा एतस्याः कश्चित् प्रियवांधवस्ते पूजां कुर्यात्? शीघ्रमेवापसर! अलमति चापलेन।

कुम्भः कलशो घटः समान एव। न कोऽपि भेद। रत्नाकरो मे जन्मदः। रत्नसोदरोऽहम्। यदा समुद्रमन्थनोदूभूतो भगवान् धन्वन्तरिर्जलेभ्यो बहिरागच्छत्तु भगवतो वामकरस्थोऽहमेवासम्। विषघटश्चाप्यहेवासम् सुधाकलशश्चापि। अमृतपानाय देवासुरकलहे सञ्जाते मोहिनीरूपधारिणा भगवता विष्णुना धृतो योऽमृतकलशः स अहमेवासम्। विष्णुकरस्पर्शपावनभूतशरीरोऽहम् सर्वथा मांगलिकः सञ्जातः। दृष्टं भवेद् भवद्भिर्हरिप्रियायाः पार्श्वस्थयोर्द्वयोः करिणोः करयोरहमेव राजमानोऽस्मि।

शिवमन्दिरेष्वपि मेऽस्तित्वं बहुमन्यते। दुग्धमिश्रितगंगाजलसम्भृतस्त्रिपादिकासंस्थोऽधोगतच्छिद्रात् निरन्तरं शिवलिङ्गोपरि बिन्दु बिन्दुजलं पातयन् आत्मानमहं धन्यं सम्पादयामि मन्दिराणां शिखरेष्वपि अहमेव शोभे। नास्तीदृशमेकमपि। मांगलिकं कृत्यं यत्र सर्वप्रथमं मे स्थापना न भवेत्। कर्मकाण्डविधि-विशेषज्ञैर्विद्वद्भिरहं सर्वतीर्थमयः स्वीकृतः यज्ञभूमिरपि मयैव सनाथा भवति। महायज्ञेभ्यः पूर्वम् कुमारिकाभिः श्रद्धाभक्तिभावोपेताभिर्नारीभिः मंगलकलशान् शिरोभिरूह्यमानाभिः कलशयात्रा सम्पूर्यते। त एव घटा यज्ञभूमौ संस्थाप्यन्ते।

नाऽहं सामान्यः। स्वज्ञानतपस्तेजो यशः प्रभाव विश्रुतस्य महर्षेरगस्त्यस्याहमेव जन्म स्थानम्। येन महायशस्विना तपस्विना विना खेदं समुद्र एव अञ्जलित्रयेण आचमितः।

साहित्यकारैः कविभिर्लेखकैश्चाहं बहुवर्णितोऽस्मि।

**'अर्धो घटो घोषमुपैति नूनम्'**

**'त्यजेत्तादृशं मित्रं विषकुम्भं पयोमुखम्'**

इत्यादीनि वाक्यानि नूनमेव कर्णगोचरतां गतानि भवेयुः। पञ्चतंत्रेऽपि मे चर्चा वर्तत्ते।

मांगलिककृत्येष्वेव मे उपयोगो भवेत् नैतावता अलम् मृतकमानवस्य प्रेतत्वं विमुक्तयेऽपि अश्वत्थम् मूले घटबन्धनविधानं वर्तते। भारतीया संस्कृतिर्मद्विहीना अपूर्णा एव। अन्यमतावलम्बिन धार्मिकजना अपि मम महत्त्वं स्वीकुर्वन्ति।

अविष्कारबहुलेऽस्मिन् साम्प्रतिके युगे तु बहुविधा धातुविनिर्मिताः कलशा वाहुल्येनोपलभ्यन्ते यत्र तत्र च प्रयुज्यन्ते। कन्याविवाहसमये पित्रा प्रदीयमानेषु यौतुकवस्तुषु 'कलशो'ऽनिवार्यरूपतः प्रदीयते, तस्य रूपं किमपि कीदृशं वा कथं भवेत्। अद्यत्वे मृत्कलशानां निर्माणं स्वल्पतरमेव सञ्जातम् स्वस्थचिक्वणमृत्तिकानुपलब्धित्वात्। कुम्भकाराणां जीविकोपार्जनवृत्तिरपि संकटापन्ना सञ्जाता।

किमपि कथं न स्यात्, केनचिदपि स्वरूपेणाहं निजास्तित्वमक्षुण्णं धारयमि। भगवतोऽनुकम्पया भविष्यति कालेऽपि मेऽस्तित्वं महत्त्वपूर्णं स्थास्यति। **शिवमस्तु।**

# सुविधाशुल्कम्

-**कृष्णदत्तः शर्मा 'शास्त्री'**

कस्त्वं भोः?

अहो! महदाश्चर्यम्! त्वं मां न वेत्सि।

अत्यम्, नाऽहं वेद्मि, कस्त्वम्।

एतत्प्रतीयते यत्ते किमपि कार्यं कदाचिद् बाधापन्नं न जातम्। जातं न जातं वा, तवानेन किं प्रयोजनम्? अहं त्वेतद् ज्ञातुमिच्छामि, कस्त्वम्? यत्र कुत्राप्यहं गच्छामि तत्रैव त्वमवलोक्यसे। किं कारणमेतस्य?

कथं नाहं सर्वत्र दृश्ये? सर्वशक्तिसम्पन्नोऽहम्। बहुरूपधरश्चाहम्। किं त्वं मे सामर्थ्यं न जानीषे?

नाऽहं ते सामर्थ्यं पृच्छामि। अहं तु त्वामवगन्तुमिच्छामि। कथितं न, सर्वशक्तिसम्पन्नोऽस्मि विशेषतोऽद्यत्वे युगे। असम्भवं प्रतीयमानं कार्यमपि सैविध्येन साधयितुं शक्तोऽस्मि यदि मे नाम विज्ञातुमेवेच्छासि तु शृणु-कोऽहम् अहमस्मि 'सुविधाशुल्कम्' इति। नाहमेकरूपधरम् बहुरूपधरं वर्ते। नास्त्येकोऽपि कार्यालयो विभागो वा यत्र मे अस्तित्वं सम्मानितं न भवेत्। केचिदेव धर्मभीरवो न्यायप्रियाः शासका अधिकारिणो लिपिकाः कर्मकरा वा सन्ति ये मां सम्मानदृष्ट्या पश्यन्ति, न च मां पार्श्वस्थं कुर्वन्ति परन्तु ते जनाः संख्यातीताः सन्ति ये मद्बलेनैव सर्वसुखसुविधासम्पन्नगृहस्थाः स्वल्पवेतनभोगिनोऽपि भूत्वा सपरिवारः सदारपुत्रः सुखेन जीवनं तथा यापयन्ति यथा मन्दिरभोगभोगिनो वित्ताढ्या जनाः। ते सुखमयं जीवनं यापयन्तो महदाडम्बरं प्रदर्शयन्तो गौरवमनुभवन्ति।

अहं तु तत्कार्यमपि सौकर्येण कारयितुं समर्थम् यत् कार्यं कोऽपि सक्षम-अधिकारी कर्तुं न क्षमते तदनुचितमपि कार्यं लिपिको माम् (सुविधाशुल्कम्) अवाप्य तत्परतया त्वरया च सिद्धं कारयति। प्रथमं मे नाम 'उत्कोच' इति प्रचलितम् अभवत्। पूर्वं मम जन्मकालसमये उत्कोचदानादानं निन्दनीयमासीत् परन्तु यथा यथा समयो गतस्तथा तथाऽहं तद्रूपं नाम वा हित्वा 'सुविधाशुल्कम्' इति नाम्ना प्रथितं जातम्।

बन्धो! कथितमेव मया पूर्वम् 'नाऽहमेकरूपमयम् बहुरूपधरम् अस्मि।' कदाचितहं द्रव्यरूपेण, कदाचित् सुरापानगोष्ठीरूपेण, कदाचिदुच्चस्तरेषु परदारोपसवनरूपेण, कदाचिच्च विविधद्रव्यार्पणरूपेण विचरामि।

मन्येऽहं समाजे देशे वा मे अस्तित्वं सर्वदा सर्वथाऽनर्थकरं वर्तते परन्तु मे प्रपोषका मां सबलम् पालयन्ति, पोषयन्ति वर्धयन्ति च। अहमहमिका मे जननी, अन्याये (बेइमानी) मे पिता। लोभः, विषयोपभोगलालसा, बाह्याडम्बरमयजीवनेच्छा, मिथ्यासुखलोलुपता, च मे पोषकाः सखायश्च।

मत्प्रभावजन्या अशान्तिर्मे सन्ततिः। समाजे देशे वा यावद् 'अहमहमिका' स्थास्यति तावदहमपि प्रबलायमानं स्थास्यामि। अन्यायस्तु मे प्रधान सहायकः। सर्वे जानन्ति।-

**अन्यायोपर्जितं वित्तम्  दशवर्षाणि तिष्ठति।**
**प्राप्ते चैकादशे वर्षे, समूलं तद् विनश्यति।**

**इति**

# अहङ्कारहरणम्

**-डॉ. शारदा रमेशः गाडगे**

आसीत् पुरा पद्मपुरे कश्चिद् जयदेवः नाम राजा। सः अतीव धैर्यवान् पराक्रमशीलः च। नैकान् शत्रून् सः लीलया यमालयं प्रेषितवान्। स्वपराक्रमेण तेन सदैव स्वराज्यं सुरक्षितम्। तस्य प्रजा अपि तस्य शौर्यं सदैव प्राशंसत्। शनैः शनैः अहंकारः तस्य मनः प्राविशत्। आत्मानं श्रेष्ठं मन्यमानः सः सर्वैः सह औद्धत्येन व्यवाहरत्।

एकदा ईश्वरः तं परीक्षितुं तं किञ्चित् उपदेष्टुं च ऐच्छत्। अतः ईश्वरेण काचित् योजना कृता। एकस्मिन् दिवसे भ्रमणार्थं गच्छन् स राजा मार्गे कमपि गलितगात्रं वृद्धम् अपश्यत्। मार्गे स्थितं तं राजा उच्चैः अवदत्, ''रे वृद्ध, कस्त्वम्, किमर्थं मम मार्गे उपविशसि ? ''

शान्तस्वरेण सः वृद्धः अवदत्, "भद्रमुख, वयः प्रवासात् मम इयम् अवस्था। नाहं शक्नोमि चलितुम्। भवान् कृपया साहाय्यं करोतु। ''

राजा क्रोधेन अवदत्, "रे मूर्ख, यदि त्वं चलितुम् अशक्तः तर्हि किमर्थम् अत्र आगतः? स्वगृहे एव किमर्थं न तिष्ठसि? नास्ति मे समयः त्वया सह भाषितुम्।'' इति उक्त्वा तम् उल्लङ्घ्य, राजा अग्रे अगच्छत्। अग्रे गत्वा कोऽपि भूमौ शयानः रुग्णः तेन दृष्टः। तस्य बन्धवः तं परितः उपविष्टाः आसन्। सर्वे चिन्तामग्नाः तं रोगपीडितं मनुष्यं समाश्वासयितुं प्रयत्नशीलाः आसन्। राजानं दृष्ट्वा तेषु कश्चित् अवदत्, ''भो मित्र! रोगपीडितः एष अस्माकं बन्धुः। सः वैद्यं प्रति नेयः। अन्यथा तस्य प्राणाः तं त्यक्त्वा निर्गमिष्यन्ति। कृपया साहाय्यं करोतु भवान्।''

एतत् श्रुत्वा राजा अवदत् , "भो पौराः नाहं वैद्यः। न वा जानामि कमपि वैद्यराजम्। भवान् एव तं नयतु।'' इति उक्त्वा तं प्रति निर्दयं नेत्रकटाक्षं निक्षिप्य राजा निरगच्छत्।

मध्याह्नसमये राजा कामपि असाहाय्यां स्कन्धदेशे बुभुक्षितं रुदन्तं शिशुद्वयं वहन्तीं युवतीम् अपश्यत्। राजानं दृष्ट्वा सा करुणस्वरेण अवदत्, ''भ्रातर, अहं भवन्तं साहाय्यार्थं याचे। मम एतत् शिशुद्वयं बुभुक्षितम्। अहमपि दिनद्वयात् किमपि न खादितवती।''

शिशुद्वयस्य आक्रोशं श्रुत्वा तस्याः महिलायाः दीनतां च दृष्ट्वा पुनश्च राज्ञः मनसि क्रोधः आपन्नः। सः तां तीव्रस्वरेण अवदत्, "अयि, किमर्थम् एवं भिक्षां याचसे? सुदृढा असि त्वम्। परिश्रमं कुरु। धनं च अर्जय। स्व शिशून् च पालय।''

सा पुनश्च किमपि वक्तुकामा आसीत्। किन्तु राजा क्षणमपि तत्र स्थातुं न ऐच्छत्। सः वेगेन अग्रे अगच्छत्। एवमेव भ्रमन् सः कस्मिंश्चित् वृक्षतले उपविष्टं ध्यानमग्नं कमपि ऋषिम् अपश्यत्। सः ऋषिं

प्रणम्य तत्रैव स्थितः। किन्तु ऋषिः तं किमपि न उक्तवान्। तदा राजा तम् अवदत्, ''ऋषिवर, मम प्रणामं भवान् किमर्थं न स्वीकृतवान्? मह्यम् आशीः कथं न दत्तवान्? ऋषिः किञ्चित् हसित्वा अवदत्, ''राजन्, कथं ददामि अहं तुभ्यम् आशीर्वादम्? यतोहि राज्ञः कृते ये गुणाः अपेक्षिताः तेषां त्वयि पूर्णत्वेन अभावः दृश्यते। न असि त्वम् उत्तमः नागरिकः। किं तर्हि तव राजपदस्य उपयोगः।'' एतद् आकर्ण्य राजा आश्चर्येन, क्रोधेन च ऋषिम् अपश्यत्। ऋषिः पुनश्च अवदत्, "राजन्, न त्वं ज्येष्ठानाम् आदरं करोषि। नास्ति ते मनसि सेवाभावः। न वा भूतदया। न त्वया वृद्धाय साहाय्यं कृतम्, न रुग्णाय, न वा बुभुक्षितेभ्यः। आदरभावः, सेवाभावः, दयाभावः एतेषां समुच्चयेन मनुष्यः यथार्थत्वेन मनुष्यत्वं प्राप्नोति। न एतत् मनुष्यत्वं त्वयि दृश्यते। अतः त्वया सम्यक् आत्मपरीक्षणं कार्यम्। त्वयि प्रपन्नः अहंकारः तव पराक्रमं धैर्यं शौर्यं च नाशयति। अतः तं त्यक्त्वा आदौ श्रेष्ठः मनुष्यः भव। अनन्तरं राजपदं भूषय। ''

ऋषेः वचनं श्रुत्वा पश्चात्तापदग्धः राजा स्वप्रमादान् श्रुत्वा चिन्ताकुलः अभवत्। सः ऋषिं प्रणम्य क्षमाम् अयाचत। तत्क्षणे एव ऋषेः स्थाने भगवन्तं शिवं दृष्ट्वा राजा आश्चर्यचकितः अभवत्। भगवान् शिवः स्मितपूर्वकम् अवदत्, ''वत्स! परीक्षितोऽसि त्वं मया। भवन्तं सन्मार्गं प्रदर्शयितुम् एष आटोपः मया कृतः। इतः परम् अहंकारः त्वां कदापि मा स्पृशतु। गच्छ त्वं स्वप्रासादम्। श्रेयः ते भविष्यति। ''

आत्मपरीक्षणेन शुद्धान्तःकरणः भगवदुपदेशेन च उन्मीलितचक्षुः सः राजा मनसि किमपि निश्चित्य तस्मात् स्थानात् निर्गतः।

# स्वभावो दुरतिक्रमः

-डॉ. शारदा रमेशः गाडगे

एकदा वानराणां विशेषसभा आसीत्। तत्र केनापि ज्येष्ठवानरेण विचारः प्रस्तुतः-''अस्माभिः निवासार्थं गृहनिर्माणं करणीयम्। अस्मासु मानवेषु च नास्ति कोऽपि भेदः। मनुष्यवत् वयमपि बुद्धिमन्तः कुटुम्बवन्तः। मनुष्याः सुन्दराणि भवनानि रचयन्ति। तेषु सुखेन निवसन्ति। वयं तु सर्वदा वृक्षेषु एव निवसामः। आतपस्य पर्जन्यस्य शैत्यस्य त्रासं च सहामहे। लघुलघुखगाः अपि कोटराणि रचयन्ति। तत्र सपरिवारं सुखमनुभवन्ति। वयमपि इतः परं वृक्षे न निवसिष्यामः'' इति।

एष प्रस्तावः तस्य विचारः सर्वैः अनुमोदितः। अनुक्षणमेव योजनाः कृताः। कार्यं च आरब्धम्। सर्वैः वानरैः नैके प्रयत्नाः कृताः। किन्तु गृहनिर्माणे न ते समर्थाः आसम्। अतः न तैः यशः प्राप्तम्। ते निराशाः अभवन्। किमपि निश्चयं कृत्वा ते भगवन्तं प्रतिगताः।

नतमस्तकाः ते वानराः भगवन्तं सविनयम् अवदन्-'हे भगवन् वयं निवासार्थं भवनानि इच्छामः। न वयं समर्थाः तेषां निर्माणे। मनुष्यवत् बुद्धिः अस्मासु अपि अस्ति। किन्तु मनुष्याः तस्याः उपयोगः कृत्वा नवनवीनानि सुखानि अधिगच्छन्ति। अस्माकं जीवने नास्ति किमपि परिवर्तनम्। निवासार्थं गृहाणि इच्छामः' इति।

वानराणां मनीषां श्रुत्वा ईषद् हसित्वा भगवान् उक्तवान् -'तथास्तु' इति।

अनन्तरं सर्वैः वानरैः सुन्दराणि गृहाणि प्राप्तानि। गृहाणां पुरतः विविधाः वृक्षाः आसन् तेऽपि पुष्पफलैः समृद्धाः। वानराः अत्यानन्देन गृहाणि प्रवष्टिाः। तत्र तैः हर्षभरात् उत्प्लवनं, नर्तनं च आरब्धम्। वातायनेषु मुष्टिभिः प्रहाराः कृताः। वृक्षाणां फलानि गृहीत्वा खादितानि। पुष्पाणि नष्टानि। सर्वं तैः क्षणात् विध्वंसितम्। गृहाणां शोभा विनष्टा। ते पुनश्च भगवन्तं प्रति गताः।

तान् वानरान् दृष्ट्वा भगवान् उवाच- 'रे वानराः, किमर्थं पुनश्च आगताः यूयं सर्वे अत्र। मया युष्मभ्यं सुन्दराणि भवनानि दत्तानि। किन्तु युष्माभिः न रक्षितानि न वा उपभुक्तानि। प्रकृत्या एव यूयं सर्वे विध्वंसप्रियाः। किमर्थं मानवैः सह स्पर्धां कुरुथ? न कोऽपि स्वभावं परिवर्तयितुं शक्नोति। स्थैर्यं युष्माकं व्यक्तित्वे नास्ति एव। अतः एव अनन्यसाधारणी उत्पतनशक्तिः युष्मभ्यं दत्ता निसर्गेण। तस्याः उपयोगं कृत्वा वृक्षेषु पर्वतेषु च युष्माभिः वस्तव्यम्। स्वकीयनिसर्गदत्तशक्तेः उपयोजनं कृत्वा यद् शक्यं तदेव सर्वैः करणीयम्। अन्येषाम् अनुकरणम्, ईर्ष्या वा न कदापि करणीया। एतादृशी स्पर्धा न कस्यै अपि सुखं शान्तिं वा प्रयच्छति' इति।

भगवतः उपदेशं श्रुत्वा लज्जिताः ते वानराः स्वस्थानं प्रतिनिवृताः। अनन्तरं तैः न कदापि भवननिर्माणस्य विचारः अपि कृतः। अतः वानराः अद्यापि पर्वतेषु वृक्षेषु वा सुखेन निवसन्ति।

**- १९-बी, भांगेविहारः,**
**त्रिमूर्तिनगरम्, नागपुरम्-२२, महाराष्ट्रम्**

# आत्मविश्वासः

–रेखा कपूरः

दीपकः प्रकाशः च द्वे मित्रे आस्ताम्। द्वे एव एकस्मिन् एव विद्यालये अपठताम्। दीपकस्य जनकः धनिकः आसीत्। सः पठने अपि कुशाग्रः आसीत्। स प्रतिवर्षे प्रथम स्थानं लभते स्म। प्रतियोगितायामपि प्रथमं स्थानं लभते स्म। एतस्मात् कारणात् सः स्व विषये निश्चिन्तो आसीत् मम स्थानम् कोऽपि ग्रहीतुं न शक्नोति।

प्रकाशस्य पिता साधारणः आसीत्। सः काठिन्येन तस्य पालनं करोति स्म। प्रकाशस्य अध्ययने रुचिः न आसीत्। तस्य परीक्षापरिणामम् अपि शोभनम् न आसीत्। सः कृशकायः आसीत्। सर्वदा दुखितः दृश्यते। सः चिन्तयति स्म मम जीवनम् व्यर्थम् एव अस्ति। अहं कोऽपि कार्यम् कर्त्तुम् न शक्नोमि। सः हीनभावनया ग्रसितः आसीत्।

एकदा प्रकाशस्य भगिनी भ्रातरम् आहूय उक्तवती त्वमेव अस्माकं गृहस्य कुल दीपकः अस्ति। त्वया प्रकाशेन एव इदम् गृहं प्रकाश्यते। भवान् ज्ञायते अस्माकं पिता काठिन्येन अस्माकं पाठयति। अस्माकं कर्त्तव्यमस्ति यत् वयम् उचितां शिक्षां गृहीत्वा योग्याः भवेयुः। भवान् स्व मनसः हीनभावना निस्सारेयत्, आत्मविश्वासं दृढ़करोतु च। आत्मविश्वासम् अस्माकं मित्रम् भवति। हीनभावना अस्माकं शत्रुः भवति।

एतत् श्रुत्वा तस्य मनसि उत्साहः जायते। सः प्रतिदिनम् पठति प्रतियोगितायाम् अपि प्रतिभागी भवति। वार्षिक परीक्षायाम् प्रतियोगितायां सः प्रथमं स्थानं प्राप्तवान्। दीपकः स्वमित्रस्य प्रगति दृष्ट्वा चकितः अभवत्।

वार्षिकोत्सवे प्रकाशं आहूय मुख्यातिथिः पुरस्कारं दत्तवान् तस्य भूरि–भूरि प्रशंसां कृतवान् च। प्रकाशः उक्तवान् मम मनसः हीनभावनां न निस्सारयति तर्हि मम मनसि आत्मविश्वासः न जायते। अहम् अपि छात्रेभ्यः प्रेरणा यच्छामि हीनभावना परित्यज्य आत्मविश्वासः ग्रहणीयः च। यस्य आत्मविश्वासः दृढः भवति सः जीवन क्षेत्रे कदापि असफलतां न लभते परम् अधिकात्मविश्वासेन अंहकारः भवति अतः अंहकारः न अपि करणीयः।

# न वाच्यम् एतादृशं वचनम्

-डॉ. अंजू बाला

महाराजः कृष्णदेवरायः विजयनगरे राज्यं करोति स्म। तस्य राज्ये रामैया नाम प्रौढः आसीत्। तस्य विषये प्रसिद्धमासीत् यत् तस्य मुखदर्शनम् अशुभम्। यः प्रभाते रामैयां पश्यति सः सम्पूर्णं दिवसं भोजनं न लभते। अत एव सर्वेऽपि तस्य मुखदर्शनं विशेषतः प्रभातवेलायां परिहरन्ति स्म।

एकदा राजा कृष्णदेव रायः वार्तेयं श्रुतवान् । सः तस्य परीक्षणार्थं निजसेवकम् आदिशत् -'' भो ! रामैया-नामानं जनं रात्रै आकार्य मम समीपस्थे कक्षे स्थापयतु। प्रभाते सति सर्वप्रथमम् अहमेव तस्य मुखं द्रक्ष्यामि''।

''यथादिशति महाराज!'' इति उक्त्वा सेवकः तथैव कृतवान्। प्रभातकाले कृष्णदेवरायेण सर्वप्रथमं तस्यैव मुखम् अवलोकितम्।

राजसभायाः कार्याणि कृत्वा राजा भोजनकक्षं प्राप्तवान्। तदा परिवेषिते भोजने एका मक्षिका पतिता इति दृष्ट्वा सः भोजनं त्यक्तवान्। पुनः भोजनस्य व्यवस्थायां विलम्बो भवति अतः सः भोजनं न कृतवान्। सः चिन्तयति - ''बहुविलम्बात् मम क्षुधा-अनुभूतिः नास्ति।''

''नूनं रामैया अशुभदर्शनः जनः। तस्य प्रातः काले मुख-दर्शनेन अहं सर्वं दिनं भोजनं न कृतवान्, सः दण्ड्यः। एवं तस्मै प्राणदण्डस्य निश्चयम् अकरोत्।

अग्रिमे दिवसे राजा घोषणामकरोत् - एषः रामैया अशुभदर्शनः। अतः एतस्मै प्राणदण्डं ददामि। सेवकः प्राणरक्षायै बहु याचनाम् अकरोत्- ''भो अन्नदातः! अत्र मम दोषः नास्ति। नाहम् अशुभ-दर्शनः। अहं क्षमा-प्रार्थी। कृपया मुञ्चतु मामहं नगरमेव त्यक्ष्यामि ।।''

राजा तु किमपि न श्रुतवान्। अधुना रामैया चिन्तितवान्- ''किं करोति निर्दोषोऽपि प्राणदण्डं प्राप्तवानस्मि। अधुना तेनालीरामं शरणं गच्छामि।''

तेनालीरामस्य समीपे सर्वं निवेदितवान् - ''भवान् एव मम रक्षकः त्वदन्यः मम रक्षकः नास्ति।''

तेनालीरामः तस्य कर्णे एवम् अवदत् - ''यदा प्रहारकर्ता तव अन्तिमाम् इच्छाम् पृच्छेत् तदा कथनीयम् - ''अहं जनतायाः समक्षे वक्तुम् इच्छामि यत् अहं तु अशुभदर्शनः यतोहि मम दर्शनेन भोजनं न मिलति किन्तु महाराज - कृष्णदेवरायस्य मुख-दर्शनेन किम्? यः महाराजस्य मुख-दर्शनम् प्रातः काले करोति सः तु प्राणान् त्यजति।'' इति उक्त्वा तेनालीरामः ततः अगच्छत्।

अन्तिमे दिवसे शूल-आरोपण-काले यदा प्रहरिण: तस्य: इच्छां ज्ञातवन्त: ते विस्मिता अभवन् त्वरितं च राज्ञ: समक्षं सर्वं निवेदितवन्त:।,

तत् श्रुत्वा कृष्णदेवराय: स्तब्ध: अभवत् अवद्त् च - ''कमेतत् रामैया तु मामेव अशुभदर्शनं सप्रमाणं घोषितुमिच्छति। अनेन अनर्थेन अलम्। शीघ्रं तं मृत्युदण्डात् मुञ्चामि।''

एवं महाराज - आदेशेन रामैया बहु-स्वर्णमुद्रा: प्राप्य तस्मात् नगरात् अन्यत्र अगच्छत् सुखेन च अवसत्।

**-२०६२,१६ ए वसुंधरा,**
**गाजियाबादः, उत्तर प्रदेशः २०१०१२**

# विद्या धनं सर्व धनं प्रधानम्

-**प्रमोदकुमारः शर्मा**

विद्या इति शब्दं ज्ञानार्थक विद् धातोः निष्पन्नः भवति। अस्यार्थः भविष्यति = विचारः मननं वा। कश्चिदपि वस्तुनः यर्थाथतः ज्ञानं विद्या इति कथ्यते।

संसारस्य समेषां विदुषां मतैक्यं वर्त्तते यत् विद्यां विना मानवस्य विकाशः प्रगतिश्च भवितुं कदापि न अर्हति। भारतीय आचार व्यवहारस्य परम्परा गृह समाजस्य विद्या यथार्थ स्वरूपं चित्रयति। आश्रित जनसंरक्षण पातिवृत्यञ्च सम्यक् कृतेन परिष्कृततया विद्या गिरां पुरस्करोति।

ये केचन सरस्वती पुत्राः सन्तिः ये विद्या व्यसिनः कवयोः विद्वांसश्च अभवन् तेषां पावनं यशः पताका अद्यापि नभसि दोधूयन्ते।

विद्या तु कश्चिदपि समाजे परमावश्यकं अस्ति। किं कार्यम् कर्त्तव्यं किं च न कर्तव्यम् इति मनुष्याः विद्याया एव निश्चयी करणं करोति। दुःखे सुखे विपत्तिषु च विद्या मनुष्यं सन्मार्गम् प्रदाति। अतः तानि कार्याणि साधनाय विद्या धनं तु परमावश्यकं अस्ति।

अयि सज्जनवृन्दः। पश्यामो वयं अद्यत्वे संसारेस्मिन् विज्ञानाश्रेये बहुविधा भौतिकी उन्नतिः कृताः। वायुयानादि दूरसंचारसाधनानि निर्माय मानवैः विश्वमेव एक कुटुम्बमेव कृतम् अस्ति। संस्कृतकविना बहु सुन्दरं उक्तम्-

**विद्या ददाति विनयं विनयाद् याति पात्रताम्।**
**पात्रत्वाद् धनमाप्नोति धनाद् धर्म ततः सुखम्।।**

इत्युक्त्यानुसारं विद्यां पठित्वा मानवाः सभ्याः सुशिक्षिताः सुनागरिकाः अनुशासिताश्च जायते। अन्यथा मानवः दानववृत्या पशुवदेव जायते।

अतः विद्या पठनसमये न प्रमदितव्यम्। ध्यानेन मनसा पठनीयम्।।

यद्यपि संसारे विविधानि धनानि वर्त्तन्ते। परं तैः मानवस्य उद्देश्य सिद्धिः प्रसिद्धिश्च न भवति।

अतः विद्वदभिः उक्तम्-

**''तानि हि साधनं आचरणी न तु साध्यानि''।**

अपरञ्च यथा प्रकाशं विना मानवः सन्मार्गं विना गहनान्धकारे स्वकीयं लक्ष्यं प्राप्तुं अक्षमो भवति तथैव विद्यां विना मानवस्य दुर्दशा भवति।

**संस्कृतकविणा उक्तम् ''विद्या विहीनः पशुः''**

मानवस्य सर्वाङ्गीणविकासो विद्यां बिना सम्भवम् नास्ति। विवेकभ्रष्टजनानां पतनं, धनस्य नि:सारता:, दुर्जजनानां चरित्र विश्लेषणं, कुमित्रलक्षणम्, इत्यादय: विषय: अज्ञानतया भवन्ति। अज्ञानता दुरीकरणं केवलं विद्यैव भविष्यति, एक मात्र साधनं विद्या अस्ति। भर्तृहरि अनुसारेण मूर्खजना: विद्याविहीन: अखिलसमाजस्य भारभूता: सन्ति पशुसमाना: सन्ति।

ये विनीता बुद्धिमान् पुरुषा: सन्ति ते सदाचारिण: भवन्ति। ते आधुनिक समाजे मानं सम्मानं यशं च प्राप्नुवन्ति। ये विद्याचारिण: विद्या व्यसनिन: सन्ति ते संसारे सदा आदरं प्राप्नुवन्ति इति।

अयि सज्जनवृन्द:! वस्तुत: वार्ता तु इयं अस्ति यत् विद्या तु एक महत्त्वपूर्णं धनं वर्त्तते। संसारेस्मिन् तु विविधा धनानि वर्त्तन्ते। अन्यानि धनानि तु व्ययेन समाप्तानि भवन्ति। चौरा: अपि चोरयितुं शक्नुवन्ति भ्रातरा:। बान्धवा: गृहस्य अन्ये परिवारीजना: धनं ग्रहीतुं गृहे कलहं कुर्वन्ति वस्तुत: वार्त्ता तु इयमेव अपि अस्ति यत् राजान: अपि अतिरिक्त करमाध्यमेन अपहर्तुं चेष्टां करोति। महत्त्वपूर्णा वार्त्ता इयमेव अपि अस्ति – विद्याधनस्य विद्वांस: वर्णनं कुर्वन्ति कथयन्ति च श्लोकमध्यमेन। श्लोकं अस्ति–

**न चौरहार्यम् न च राजहार्यं**
**न भ्रातृभाज्यं न च भारकारि।**
**व्ययेकृते वर्धते एव नित्यम्**
**विद्याधनं सर्वधनप्रधानम् ।।** (नीतिशतक)

विद्याधनं तु यावच्चेदं वितीर्ययते तावदेव वृद्धिं आयाति। सत्यमेवोक्तं कविभि: –

**अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारती।**
**व्ययतो वृद्धिमायाति क्षयमायति च सञ्चयात्।।** (पञ्चतन्त्रम्)

अपरञ्च विद्यया अपूर्व: यश: सम्मानं च लभ्यते। यदा यदा व्ययं करिष्यति तदा इयं वृद्धि: प्राप्स्यति। यावच्च लोभाभिभूतात् सञ्चयं करिष्यति। तावदेव क्षयं प्राप्स्यति। अत: एव विद्यया प्राप्तिं प्रति स्वकीयं लक्ष्यं निर्माणं करोतु। उक्तमपि –

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते। राजा तु केवलमेव स्वदेशे पूज्यते किन्तु विद्वान् तु सर्वत्र पूज्यते, यशं अपि लब्धं करोति। उक्तम् च

**क्षीयन्ते खलु भूषणानि सततं। वाग्भूषणं भूषणम्।।**

विद्या तु अलङ्कृतापि विद्यते। तच्च शाश्वतं तिष्ठति विद्या न केवलम् ऐहिकी उन्नतिरेव जायते। अपितु पारलौकिक उन्नतिरेव जायते। विद्यया मानवस्य चरमोद्देश्य मोक्षोधिगाम्यते– ऋषिणा उक्तम्–

**''विद्ययामृतमश्नुते''**

विद्यां पठित्वा मानव: अमृतं प्राप्स्यति सुखं प्राप्स्यति। उक्तम्–

**''विद्या परा देवता ''**

अत एव सर्वेषां कर्त्तव्यं वर्तते यत् परिश्रमेण विद्या लभेरन। विद्या तु देशस्य उन्नतये परमावश्यकम् अस्ति। यदा देशस्य उन्नतिः तदा तु सर्वेषां उन्नतिः भविष्यति।

**उपसंहारः-**

मनुष्यजन्मः तु सर्वोत्तमोऽस्ति। मनुष्यः अवसरं निःसारयित्वा समग्रमपि कल्याणं अभ्युदयं वा निःश्रेयसं साधयितुं शक्यते। यदा तु मनुष्यः शुभ अशुभ कर्म करणाय स्वतन्त्रः अस्ति तदा विद्या चरणेन सम अभ्युदयं निःश्रेयसं अधिगन्तुं शक्नोति। ये विद्याचारि विद्याव्यसनिनः सन्ति ते सदा लोकस्य देशस्य वा हिताय प्रवर्त्तते।

किं ब्रूमो विद्या प्रशंसायाम् यावदेव कथयामः तावदेव न्यूनमेव।।

# संस्कृते वैश्विक-विषाणुज-संक्रामक रोगविमर्शः

-डॉ. कैलाशनाथः द्विवेदी

संस्कृत-वाङ्मये सामान्यतः सामान्यरूपेण पर्यावरणविपर्यये प्रदूषितवातावरणे ऋतुपरिवर्तने च वैश्विकविषाणुजानां प्रभावेण नैकसंक्रामकरोगाणामुल्लेखः प्राप्यते। एषु वैश्विक विषाणुज संक्रामकरोगेषु विषूचिका-मूषिकरोगयक्ष्माशीतला-(वसन्तरोग)कोरोनाऽऽदयः रोगाः समुल्लेखनीयाः सन्ति।

ऋग्वेदे पर्यावरणप्रदूषित्वात् ये संक्रामकरोगाः प्रादुर्भवन्ति, तेषु विषूचिकायक्ष्मा राजयक्ष्मा-वोल्लिखिताः[१] सन्ति। एवमेव अथर्ववेदस्य रोगकाण्डेऽपि[२] कतिपय संक्रामकरोगाणामुल्लेखः प्राप्यते, येषु यक्ष्माविषुचिकामूषिकरोगाः प्रमुखाः सन्ति।

चरकसंहिता-सुश्रुतसंहिता-वाग्भट्टाष्टाङ्गहृदयसंहिता-प्रभृति प्राचीनायुर्वेद-सम्बन्धिग्रन्थाननुसृत्य अभिनवामृतसागरेऽपि संक्रामकविषाणुरोगाणां सरला चिकित्सा निदर्शिताऽस्ति।

साम्प्रतं संसारे 'कोरोना-विषाणुजव्याधिरयं प्रत्येकं राष्ट्रं प्रपीडयन् प्रासरत् प्रतिदिनम् सर्वत्र। श्रूयते यत् चीनदेशे अजिनपत्रा (BAT)नाम्नः पक्षिणो मांसभक्षणादयं वैश्विक संक्रामक 'कोरोना' विषाणुः महामारमेव सम्प्राप्तः। विषाणुरयं मानवकेशस्य शतांशादपि सूक्ष्मः स्वीक्रियते प्रमुखवैज्ञानिकैः। तदेवादृश्यरूपेण सर्वं संसारं शोकसन्तप्तं करोति। विश्वस्वास्थ्यसंगठनम्' (WHO) इति प्रसिद्ध संस्थया व्याधिरयं 'महामारी' (Epidemic Disease) 'कोरोना' नाम्ना प्रागेवोद्घुष्टोऽस्ति।

'कोरोना' विषाणुरयं चीनदेशे सर्वप्रथमं दिसम्बर २०१९ मासे प्रादुरभवत् एवमेवाऽवधारणा विश्वस्वास्थ्य संघटनस्य। ततः प्रागेव चीनदेशे प्रसृतोऽयं वैश्विकसंक्रामक विषाणुजमहामारीति जनश्रुतिरपि विश्रुताऽस्ति। विषाणुरयं विभिन्नप्रकारैः सर्वजनान् प्रभावयति, तथा हि बहुधास्य सामान्यं लक्षणं परिलक्ष्यते एवम्-तापः (ज्वरः), शुष्कः कासः, क्लमः, श्वसने पीडाप्रभृतीति। क्वचिदेवमपि व्याधिलक्षणं संलक्ष्यते- कष्टायितं कण्डूयनं, कण्ठपाकः, श्वसने कष्टयुन्नेत्रपीडा, अतिसारः, स्वादानुभवशून्यता, पादांगुष्ठविवर्णतेत्यादि। विषाणुरयं सर्वथाऽदृष्टपूर्वोऽस्ति। प्रायः परिलक्ष्यन्ते-प्रतिश्याम-फ्लूरोगाक्रान्तेष्वपि लक्षणानीमानि।

विज्ञानजगति साम्प्रतमपि 'कोरोनारोगप्रतिरोधकस्य गवेषणा नैव संजाताऽस्ति। संसारेऽनेकदेशेष्व-संख्या जनाः कालकवलिता अभवन् अनेन महामारिप्रकोपेन। कोरोना-संक्रमितानां प्राणशून्यानाञ्च

प्रतिदिनं भूयसी संख्या परिवर्धत एव। व्याधेरस्य प्रादुर्भावसमये चीनदेशेन समुद्घोषणा नैव कृता। संसारेऽन्यदेशान् दुष्प्रभावयितुं दुश्चेष्टया च चीनदेशवासिनां देशान्तरीयाणां नैवाऽरौत्सीत् सम्पर्कं यातायातञ्च। अनेनैव संसारे सर्वत्र व्याधेरस्य प्रसारो संजातः परिणामतोऽमेरिका-इटली-फ्रांस-स्पेन-पेरू-ईरान-प्रभृतिसमृद्धदेशानां दुरवस्थैव भवत्।

कोरोना-विषाणुरोगस्य वैश्विक कुप्रभावमभिलक्ष्य अर्वाचीनसंस्कृतकविभिरस्य प्रभावोत्पादिकाऽभिव्यक्तिः कृता स्वकीयकाव्यकृतिषु। अस्मिन् सन्दर्भे नवोदितः संस्कृत-कविः- डॉ. अरविन्द कुमार तिवारी दूतकाव्य-परम्परायाः श्रेष्ठ महाकविं कलिदासमनुसृत्य २२५ मन्दाक्रान्तापद्येषु 'कोरोना-सन्देशम्' विरचितवान्। कविर्दूरभाषमाध्यमेन कोरोना-संकटसमये स्वकीयां भार्यां दुर्गासप्तशतीमभिलक्ष्य दुर्गापाठाय प्रेरयति सान्त्वनाञ्चैवं ददाति-

**दुर्गापाठं कुरु कुरु शुभे न व्रतं हे कृशांगि!**
**प्रातः सायं भज हरिहरौ सादरं मां विपन्नम्।**
**चिन्ता कार्या न हि कथमये मत्कृते प्रार्थयेऽहम्,**
**सन्तिष्ठन्तेऽसुखददिवसाः सर्वदा नो जगत्याम् ॥** (कोरोना .६)

कोरोना-संक्रमणकाले महाराष्ट्रस्य पालघरक्षेत्रे महात्मानौ तच्चालकश्च निहत्ता इति घटनया काव्यनायिकायाः स्वाभाविकाक्रोशोऽभिव्यक्तोऽस्मिन् पद्ये एवम्-

**बान्द्रायां ह्यः सपदि भवता लोकितं निन्दनीयं**
**कृत्यं भर्तः! कुजनरचितं येन दग्धं मनो मे।**
**कोरोना संक्रमण समये हीदृशं पादितं यै-**
**र्दण्ड्या नूनं प्रबललगुडैस्तेऽधमाः शीघ्रमेव॥** (कोरोना.७२)

कोरोनासंक्रमणकाले काव्यनायकोपरि कीदृशो करुणविप्रलम्भमयो भावो वर्तते पद्येऽस्मिन् अवलोक्यताम्-

**कोरोनाख्या विचरति भुवि प्रायशो लोकहन्त्री,**
**दैत्यादृश्या बहु वितनुते रोगजालं सुकेशि!!**
**सर्वं देशे गृहिणि! पिहितं व्याकुलं मानसं मे,**
**हा किं कुर्यां वद सुवदने दुर्दिने दूरगेहः॥** (कोरोना .३)

भीषणकोरोनासंक्रमणभयाच्छासनादेशाच्च निरुद्धप्रस्थानः काव्यनायकः स्वकीयां नायिकां देवपूजायै प्रेरयन् स्वपित्रोस्सेवां समाचरितुमादिशति पद्येऽस्मिन्नेवम्-

**भार्ये गेहे महितजनकः सेवनीयोऽतिवृद्धो,**
**माता सेव्या सलिलनयना सर्वथा पूजनीया!**

**रक्ष्यो यत्नैश्चपलचपलो देवरः पुत्रकल्पः।**

**कोरोनायाः कुपितनयनात् कामये कोमलाङ्गि॥** (कोरोना .७)

'कोरोनाव्याधिपरित्राणार्थं सामाजिकदूरता मुखाच्छादनिका विषये कविः कथयति-

**गेहाद्दूरं व्रज न हि शुभे श्रूयतां वेदनां मे,**

**सेवस्वैवं प्रणयवचनं भाषमाणा दयार्द्रे!**

**मास्कं चास्ये विकटसमये सन्निबद्ध्यैव प्रेम्णा**

**लक्ष्मि! प्रायः सदनललने वर्तितव्यं यथेच्छम्!!** (कोरोना.८)

कोरोनासम्प्रसारे उत्तरदायिवञ्चकान् प्रति स्वकीयाक्रोशमेवं प्रकटयति कविरेवम्-

**नीत्वा रोगं दनुजकुलजा भारते वा विदेशे,**

**संस्था-गेहे विपदि बहवो मृग्यमाणा विषाक्ताः।**

**अन्विष्यन्ते परमिह न ते कारयन्ते चिकित्सां**

**लीनादीना मरणसमये वंचयन्ते वराकाः॥** (कोराना .५७)

कविवरोऽभिराजराजेन्द्रमिश्रः स्वकीये 'कोरोनाशतकमिति काव्येऽनेक संक्रामकरोगेषु 'कोरोना' वैश्विकव्याधिमेवमुल्लिखति-

**यथाऽऽसीन्महदातंको गौरांगशासनावधौ।**

**विषूचिका महामार्याः प्लेगनाम्न्या रुजोऽथवा॥**

**ततोऽपि दारुणं जातं भैरवं च महद्भयम्।**

**कोरोनाया महामार्या दुराधर्षं निरौषधम्॥** (कोरोनाशतकम् १-२)

विषाणुज-कोरानालक्षणं दुष्प्रभावञ्चास्यैवं निरूपयति प्रो. राजेन्द्र मिश्रः-

**विषाणुरस्य रोगस्य क्षणेनैव प्रवर्धते।**

**शतं सहस्रं लक्षं वा हित्वा कोटिगुणायते॥**

**अयं विषाणुर्नासातो मुखाद्वा नेत्रवर्त्मना।**

**प्रविश्य फुफ्फुसं कम्रं संक्राम्यति निरौषधः॥**

**नयनं जायते रक्तं किंशुकपुष्पलोहितम्।**

**ज्वरश्चापि कृतैर्यत्नैरसह्यः प्राणघातकः॥**

**आगमो निर्गमश्चापि निःश्वासस्य प्रबाध्यते।**

**फुफ्फुसोऽप्यन्ततो बिद्धस्सविस्फोटं विनश्यति।**

**नाम्नाऽप्यस्या महामार्या न केनाापि श्रुतं पुरा।**
**धूमकेतुरयं दृष्टस्सहसैव विलक्षणः।।**
**प्रशमनोपायाः केऽपि सम्बभूवुर्न सार्थकाः।**
**न च केनापि राष्ट्रेण समाधानं गवेषितम्।।**
**हा हा कारस्ततो विश्वप्रांगणेऽद्य समुत्थितः।**
**वैज्ञानिका दधद्गर्वाः कान्दिशीकाः विलोकिताः।।** (कोरोना .३-९)

कोरोना-महामार्या निवारणोपायाः संक्षेपे स्वकाव्ये कविवरेण निरूपिता एवम्-

**स्वदेशीयो भवेन्मित्रं मित्रं वैदेशिकोऽथवा।**
**अलं तस्य परिष्वंगैश्चुम्बनैर्हस्तमेलनैः।।** (कोरोना .३७)
**पशुमांससंस्थिता रोगाः प्रविश्य घ्नन्ति मानवान्।**
**गुणाः शाकस्थिताः किन्तु पुष्णान्त्येव निजाश्रयम्।।**
**गूढं रहस्यमेतद्धि नो विजानाति मानवः।**
**जिह्वालौल्यवशीभूतः शवमांसं भुनक्त्यहो।।** (कोरोना .९०-९१)

कोरोनासंक्रमणकाले कविवरः सर्वथा सद्धर्मपालनाय जीवहिंसां सदैव त्यक्तुमुपदिशति सर्वमानवान् एवम्-

**सन्ति हीनबला यद्वा त्वच्छलेन प्रवञ्चिताः।**
**तत एव निहन्यन्ते युष्माभिः पशु-पक्षिणः।।**
**अन्यथा ते क्षणेनैव हन्तुं युष्मानपि क्षमाः।**
**मिथ्यागर्वं ततो हित्वा धर्मवृत्तिं समाचर।।**
**स्वयम्भोः ससुखं जीव जीवयाऽन्यान् यथोचितम्।**
**जिह्वारसमेवादातुं मा मा प्राणहरो मेव।।** (कोरोना .१०७-१०८,१११)

सामान्यतः यक्ष्मादि समस्त संक्रामकरोगनिवारणार्थमृग्वेदे[५]ऽग्निसूर्यापं प्रति प्रार्थना कृताऽस्ति प्राचीन मुनिभिरप्रदूषितपर्यावरणे स्वाश्रमेषु वनेषु निवसन्[६]। वैश्विकविषाणुज कोरोना सदृश संक्रामकरोगं संलक्ष्य मयाऽपि स्वविचारः प्रकटित एवम् कोरोनात्पत्तिकारणम्-

**हा! भौतिक विकासार्थं विनाशः प्रकृतेर्भुवि।**
**क्रियते मानवैर्नित्यं साभिमानमहो महा ।। १।।**
**भूजलवायुतापेषु वैषम्यं जायते क्षितौ ।**
**विपर्ययाद्धि प्रकृतेः जलवायुः प्रदूष्यते।। २।।**

**पर्यावरणदोषैर्वै जायन्ते विषाणवः।**
**एषां प्राप्य सुसम्पर्कं रोगाः संक्रामका भुवि॥ ३॥**
**शीतलामूषिकैः रोगो, यक्ष्मा चैव विषूचिका।**
**कोरोनासदृशारोगाः संक्रामका विषाणुजाः ॥ ४ ॥**
**विवर्जितखानपानेन निन्द्यव्यवहारेण च।**
**चीनदेशेन कोरोना रोगः सृष्टो विषाणुजः ॥ ५॥**

कोरोना लक्षणम् -

**तापः कासक्लमः शुष्कः श्वसने संकटं महत्।**
**स्वादानुभवराहित्यं कोरोनालक्षणं श्रुतम्॥**

कोरोना-कुप्रभाविता देशाः -

**आफ्रीका-इटली-फ्रांसः, रूस-ईरान-भारतः।**
**नैकदेशाः समाक्रान्ताः संक्रामक विषाणुना ॥**

आयुर्वेदानुसारमुपचारः कोरोनाया एवम्-

**आयुर्वेदानुसारेणौषधयो यादृशाः कल्पिताः।**
**गिलोयदालचीनीयुत् हरिद्रातुलसीदलम् ॥**
**आर्द्रकं तप्ततोयेन सेवनं सुखदं सदा।**
**कवोष्णं जलपानञ्च प्रातः सायं ध्रुवं भवेत् ॥**
**वारं-वारं करौ नित्यं प्रक्षाल्यौ फेनवारिणा।**
**प्रच्छाद्या स्वमुखनासौ मास्केनैवाऽनिवार्यतः ॥**
**कृत्वा परस्परं दूरीं तिष्ठन्तु स्वजनाः सदा।**
**दूरीकुर्वन्तु कोरोनां विषाणुं विश्वभारकम् ॥**

समीक्षा-

सामान्यतः संक्रामकविषाणुरोगाणां निवारणार्थं सुन्दर-सुरम्य-जलवायुना सार्धं शुद्धखान-पान-पवित्राचार-विचारादीनां महतीहाऽवश्यकताऽनुभूयते मनीषिभिर्महापुरुषैरायुर्वेदवेतृभिः। अत एव साम्प्रतमपि विसूचिका यक्ष्मा मूषिकरोग (प्लेग) शीतला (चेचक) प्रभृतिपुरातनसंकामकरोगैः सह संसारे सम्प्रति संवर्धित कोरोनामहामार्या प्रभावी समुपचारः सर्वैः सावधानतया करणीयः।

परमसन्तोषस्य विषयोऽयं, यदस्माकं सर्वकारः सर्वतो भावेन सर्वभक्षककोरोनाया दुष्प्रभावं नियुन्तं सचेष्टः संलक्ष्यते सर्वराज्येषु। कोरोना-दुष्प्रभावात् परित्रातुं परमार्थिप्रशासकानां, चिकित्सकानां, जनसम्मर्द-नियंत्रकानामारक्षिणाम् च समूहः सर्वथा सचेष्टः समवलोक्यते सर्वैः।

अत एव जनसामान्यस्याऽपि कर्त्तव्योऽस्ति, यत् सः सदाऽऽत्मानुशासनपूर्वकं सर्वकारस्य निर्देशमनुपालयन् कोरोनामहामारीं निरोधाय तत्परो भवेत्। अहम् आशान्वितोऽस्मि, यत् यथाशीघ्रं कोरोना-वैश्विक व्याधिं विजित्य सर्वथा स्वस्थो भूत्वा भारतीयजनता सर्वसंसारमपि स्वस्थं, सुखिनं समृद्धञ्च सम्प्राप्स्यति। अस्माकमियमभिलाषाऽपि परिपूर्णा भविष्यत्येव-

**'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद दुःखभाग्भवेत् ॥** इति शम्।।


सन्दर्भा :-

१. ऋक्. १/१२२/९, १०/९७/११-१२, १०/१६१/१, १०/१६३/१-६, १०/११७/७
ऋक्. १/११६/१६, ११७/१७, १८८/७

२. अथर्व. रोगकाण्डे १-१२, २-८, ९-८

३. अभिनवामृतसागरे (हिन्दी भाषासंस्करणे) चतुर्थतरंगे (विषूचिका.पृ. १४२-१४४)
सप्तदशतरंगे (शीतला, पृ.३९७), एकविंशतितरंगे (कृमिज-यक्ष्मा,पृ.४८६)

४. दुर्गासप्तशती ''रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान्।
त्वामश्रितानां न भयं नराणां त्वामाश्रिता आश्रयतां प्रयान्ति।।''

५. ऋक्. १०/९/४ आपो भवन्तु पीतये। १,१०/३७/४, ६/५०/७
ऋक्. ८/१८/९,१०

६. द्रष्टव्य: - लेखकस्य डी.लिट्. शोधग्रन्था:- 'ऋग्वैदिक भूगोल', कानपुरम् १९८५
पृ.-२६६-२६९ (ऋग्वैदिक चिकित्सा विज्ञानसन्दर्भे)



**-पूर्वप्राचार्यः**
**कुसुमकुलायः, सूर्यनगरम्**
**अजीतमलः (औरैया) उ. प्र.-२०६१२१**

# न दैन्यं न पलायनम्

-डॉ. राधेश्याम गंगवारः

जीवनमिदं सुखदुःखात्मकम्। जगति यथा निशानन्तरं दिनं, दिनानन्तरं च रात्रिः, तथैव जीवने सुखानन्तरं दुःखं, दुःखान्तरं च सुखमिति। तत्र लाभो हानिः, जयः पराजयः, उत्थानं पतनम्, हर्षो विषादः, उत्कर्षोऽपकर्षः, सम्पद् विपद् च सुख दुःखयो स्वस्थान्तरमेव। सामान्य जनास्तु सुखे प्रकामं प्रसादमनुभवन्ति, दुःखे च नितान्तं विषीदन्ति, दैन्यं व्रजन्ति, कार्पण्यं गच्छन्ति, पलायन्ते च। परन्तु धीरा वीरा गम्भीरा गतगर्वा मनस्विनश्च धैर्यमाश्रित्यैव विपद्वैतरणीमुत्तरन्ति। विपदो यावतीं गुरुतां यान्ति, तेषामुत्साहोऽपि तावान् प्रबर्धते। ते च न कदापि नैराश्यं श्रयन्ते, नालस्यं दधति, न प्रमादमेव, प्रत्युत परमेणैक धैर्येण, वीर्येण, विक्रमेण विवेकेन पराक्रमेण च प्रतिकुर्वते, साफल्यं च लभन्ते। अत एव तेषां ध्येयवाक्यं सूत्रत्वेन प्रतिपादयता निर्दिश्यते महर्षिणा व्यासेन-

**' न दैन्यं न पलायनम्'**

**उत्थान वता हि भाव्यम्-**

अभिमानवतो मनस्विनः प्रियमुच्चसंश्रयमारुरुक्षतो विनिपातनिवर्तनक्षयमालम्बनं किलात्मपौरुषमेव। कार्यापेक्षी तु साक्षात् प्रतिरुद्धपराक्रमोऽपि उपायान् सन्धाय पौरुषं प्रवर्तयति। सम्पदः समन्विष्य च तादृशं वृणुते स्वयमेव। तस्मादुत्थनवता हि भाव्यं पुरुषेण इति प्रोच्यते मत्स्यपुराणे-

**व्यक्त्वालसान् दैवपरान् मनुष्यान् उत्थानयुक्तान् पुरुषान् हि लक्ष्मीः।**
**अन्विष्य यत्नाद् वृणुयान्नरेन्द्र तस्मात्सदोत्थानवात हि भाव्यम्॥[१]**

**न तस्य लोके भयमस्ति किञ्चित्-**

धीमन्तः उत्साहसम्पन्ना अध्यवसायसमन्विताश्च पौरुषेण दैवमपि प्रबाधितुं पारयन्ति। मनुष्यदेवास्ते सदैव परपरिवादन मूकाः परदारदर्शने जात्यन्धा पररहस्यबधिरास्तिष्ठन्ति। परमार्थाय हि दिवो भुवि यान्ति। दानेन संभाषणेन देवार्चनेन सभाजनेन च सुखयन्ति लोकम्। अतः एवाभीधीयते-

**स्वर्गस्थितानामिह जीवलोके चत्वारि तेषां हृदये वसन्ति।**
**दानं प्रशस्तं मधुरा च वाणी देवार्चनं ब्राह्मणतर्पणं च॥[२]**

नवनीतोपमं वचः करुणापरं मनः, विद्यावदातं मुखं, दयार्द्रहृदयं च प्रत्यक्षलक्षणं सताम्। तादृशां धर्मशीलवतां निरभिमानिनां परमार्थरतानां च लोके नेह किञ्चिद्भयमिति। उक्तं च भविष्यपुराणे-

---

१. मत्स्य पु. २२१.११
२. पद्म पु. ५.४६.१३१

**योधर्मशीलो जितमानरोषो विद्याविनीतो न परोपतापी।**

**स्वदारतुष्टः परदारवर्जितो न तस्य लोके भयमस्ति किञ्चित्।।**[3]

**प्रारब्धमुत्तमगुणा न परित्यजन्ति -**

उत्तमास्तु प्रज्ञा पराक्रम प्रभृतिगुणैः समन्विता भवन्ति। देशं कालं च विज्ञाय पौरुषं वितन्वन्ति। पुरुषकार वै तेषां सर्वस्वम्। यथा हि गोधा शरदः शतं फणी सहस्रं, क्रौञ्चश्च चिरं जीवति। तथैव ते पुरुषार्थिनो भवन्ति लोक, तद्यथा–

**गोधा प्रजीवति शरच्छतकालमानं देहं विभर्ति भुजगः शरदां सहस्रम्।**

**क्रौञ्चोऽपि जीवति चिरं तदिदं विचिन्त्य लोके नरेण पुरुषार्थपरेण भाव्यम्।।**[4]

अपि च तेजसा, ओजसा, वीर्येण, प्रतिभा प्रकर्षेण च ते दुःसाध्यमपि सुसाध्यम्, अशुभमपि शुभम्, नीरसमपि सरसम्, सापदमपि निरापदम्, क्रूरमपि वदान्यम्, ग्रावाणमपि सहृदयम् विपन्नमपि सम्पन्नम्, कुरूपमपि रूपसम्पन्नं कर्तुं प्रभवन्ति। सर्वात्मना कार्यसिद्धिस्तु प्रयोजनं तेषाम्। कार्यं वा साधयेयं देहं वा पातयेयमिति कृतिनिश्चयाः प्रवर्तन्ते क्रियासु। विघ्नैः पुनः पुनः बाध्यमाना अपि नो विभ्यति न विषीदन्ति न च परित्यजन्ति। उक्तं च विशाखदत्तेन–

**प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**

**विघ्नैः पुनः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमगुणा न परित्यजन्ति।।** [5]

**वाच्यतां याति नो सताम्–**

भिन्नवृत्तिर्हि लोकः। तथाहि एके स्वगृहे, अपरे पलायन्तः, अन्येऽन्नं भुञ्जन्तः, इतरे जलं पिबन्तो वा निधनं प्रयान्ति। व्यसनप्रसारितकरो मृत्यु गृहणाति सर्वानपि। तथापि मनस्विनः स्वधर्म इति विचिन्त्य सत्कर्मसु प्रवर्तन्ते। अथ च कदापि नालसं संयाति,न प्रमादं व्रजन्ति, न दैन्यमनुभवन्ति, न स्थानं व्यजन्ति, न च गच्छन्ति कार्यण्यमेव। ततो नो यान्ति वाच्यतां सतामिति।

अत उच्यते–

**एके म्रियन्ते स्वगृहे पलायन्तोऽपरे जनाः।**
**भुञ्जन्तोऽन्नं तथैवापः पिबन्तो निधनं गताः।।**
**तथापि यत्नः कर्त्तव्यो नरैः सर्वेषु कर्मसु।**
**कुर्वन् पुरुषकारं तु वाच्यतां याति नो सताम् ।।**[6]

**जनयति जननी सुतं विरलम्–**

जगदिदं परिवर्तनशीलं नेह वस्तु किमपि ध्रुवं शाश्वतं वा। यथा देहे कौमार्य यौवनं जरा जन्मान्तरं च परिवृते स्वस्थान्तरम्, तथैव सुख दुःखे परिवर्तेते। तत्र बुद्धिमान् तु समत्वेन सर्वमुपास्ते। उक्तं च–

३. भविष्य पु. १.७३.४७ ५. मुद्रा रा. १.१७
४. सूक्ति मु.१५६ ६. मा. पु. २.५१.६३

**सुखं वा यदि वा दुःखं प्रियं वा यदि वाऽप्रियम्।**
**प्राप्तं प्राप्तमुपासीत हृदयेनापराजितः॥**[7]

अथ च धीमान् सर्वत्र निष्कामभावनया कर्म कुरुते। स च न सम्पदि हृष्यति, न विपदि व्यथते, न रणे विभेति। निर्ममं निरहंकारं योगस्थं समदर्शिनं त्रिभुवनतिलकं सुतं विरलं जनयति जननी काचिदेव। तथाहि–

**सम्पदि यस्य न हर्षो विपदि विषादो रणे न भीरुत्वम्।**
**तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्॥**

**न दैन्यं न पलायनम्** –

कार्यार्थिनो मनस्विनस्तु स्तुतिनिन्दां लोभमोहं जीवनमृत्युं चावगत्य सर्गपथे प्रविशन्ति। न तत्र कदापि सुखं वा दुःखं गणयन्ति, विक्रमेण स्वाराज्यं विस्तृणन्ति, नयेन प्रशासति अमृता वसन्ति च। अत एवोच्यते गीतायाम्–

**हतो वा प्राप्स्यपि स्वर्गं जित्वा भोक्ष्यसे महीम्।**
**तस्यादुत्तिष्ठ कौन्तेय! युद्धाय कृतनिश्चयः॥**

वस्तुतः राष्ट्रहितं सम्पादनमेव महतां धर्मः। **''प्राणा यान्तु न च धर्मः''** इत्येव तेषां दृढः सिद्धान्तः। तस्मै च ते किमपि कर्तुं सहर्षमुत्सहन्ते। तथाहि ''महान्तोहि धर्मस्य कृते लुण्ठ्यन्ते पात्यन्ते, हन्यन्ते, न धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा निशीथेष्वपि, वर्षास्वपि, ग्रीष्मधर्मेष्वपि, महारण्येष्वपि, कन्दरि कन्दरेष्वपि, व्यालवृन्देष्वपि, सिंहसङ्घेष्वपि, वारणवारेष्वपि, चन्द्रहास चमत्कारेष्वपि च निर्भया विचरन्ति।'' तद् धन्यास्ते सुकृतिनो महाजनाः। ये हि सहर्षं सोत्साहं सर्वं साधयन्ति। अत एव सत्यमेव– अर्जुनस्य वचन द्वयम्– **'न दैन्यं न पलायनम्।'**

**–वरिष्ठ प्रवक्ता, संस्कृत विभागे,**
**रा. स्ना. महा., पिथौरागढम्–२६२५०२**
**(उत्तराखण्डम्)**

७. महा. १२.२५.२६

८. महा. १.

# संस्कृतशास्त्रेषु विज्ञानतत्त्वानि

-डॉ. जीतराम भट्टः

संस्कृतभाषायां विज्ञानतत्त्वानां सम्यग्वर्णनं विद्यते, किन्तु पाश्चात्यजनप्रभावितैः कश्चित् जनैः मिथ्या प्रचारः क्रियते यत् संस्कृतशास्त्रेषु कपोलकल्पना वर्तते। यद्यपि विज्ञानतथ्यानां विषये धारणा वर्तते यत् तेषामाविष्करणं बहुधा पाश्चात्यैः वैज्ञानिकैः विहितम्, परन्तु प्रचाराभावे सति जनाः न जानन्ति यत्तेषां मौलिक चिन्तनं संस्कृतग्रन्थेषु बहुवर्षेभ्यः पूर्वमेवाभवत्। यथा पृथिव्याः विषये संस्कृते स्पष्टमुल्लिखितं यद् **'धारणाच्च धरा प्रोक्ता पृथ्वी विस्तरयोगतः।'** भास्कराचार्येण लिखितं यत् इयम् पृथ्वी पञ्चभूतात्मिका अस्ति। क्रमशः चन्द्र-बुध-शुक्र-रवि-भौम-गुरु-शनि-नक्षत्र-कक्षाभिः आवृता अस्ति। मनुजादिसहिताः पर्वतग्रामवन-उपवनादिभिः सुशोभिता इयं पृथिवी कदम्बपुष्पग्रन्थिं परितः केसरप्रसार इव अवलोकिता वर्तते। भास्कराचार्येण सिद्धान्तशिरोमणिग्रन्थस्य गोलाध्याये एवमेव प्रतिपादितम्-

**सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः।**
**कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव॥**

सिद्धा०शि०गोला० भु०को०श्लो० ३-१४७

**संस्कृतशास्त्रेषु विज्ञानतत्त्वानि-**

पृथ्व्या आधारविषये यद्यपि कुत्रचित् प्रतीकात्मकं वर्णनं प्राप्यते, किन्तु शाकल्यसंहितायाम् भूमेराधार-कल्पनायाः निराकरणम् दृश्यते। यत्-

**आधारकल्पनाभावात् कूर्मस्यापि शरीरिणः।**
**अनवस्था प्रसङ्गाच्च खे भूस्तार्थ्यवदाश्रिता॥**

-शाकल्यसंहिता

शाकल्यसंहितोक्तं इदं मतं भास्कराचार्येण अपि स्वीकृतम्। अत्र कथनस्य अभिप्रायः अस्ति यद् यदि भूमेः आधारः कश्चन स्वीकृतः तथा तस्य अपि अन्यः आधारः स्वीकरणीयः अन्यस्यापि अन्यः आधारकल्पनायाम् अनवस्था दोषः उत्पद्यते। अनेन मतेन अनवस्था दोषकारणात् पृथिव्यामेव स्वशक्तिः कल्प्यते। तदा सर्वप्रथमम् एवम् किमर्थं न कथितं यत् इयं पृथिवी स्वशक्त्या आकाशे स्थिता वर्तते। प्रसङ्गेऽस्मिन् भास्करः कथयति यत् यथा अर्कानलयोः ऊष्णत्वं, विधौ शीतलत्वम्, जले द्रवत्वम् पाषाणे कठिनत्वम् वायौ च स्वभावतः पञ्चत्वशक्तिः वर्तते तथा एव भूमौ अपि स्थिरत्वशक्तिः वर्तते।

आचार्येण भूरचला स्वभावतः इति उल्लिखिता। चिरकालाद् अचलत्वाद् अस्याः अचला इति नाम सार्थकं भवति। अत एव पृथिव्या नास्ति कोऽपि मूर्तः आधारः अपितु ब्रह्मणः धारणात्मिकया शक्त्या समन्तादाकर्षणशक्तेः आकाशे निराधारा तिष्ठति। यथा सूर्यसिद्धान्ते वर्णनं सुस्पष्टं मिलति।

**मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति।**
**बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम्॥**

-सू०सि०भू०अ०श० १२

पृथ्व्याम् आकर्षणशक्तिः वर्तते। यथा पृथिवी आकाशस्थान् गुरुपदार्थान् स्वाभिमुखम् प्रति आकर्षति। प्राचीनज्योतिर्विद्भिः भूगोलोऽयम् ब्रह्माण्डमध्ये कथितः। अतः अनेन यदा कोऽपि पदार्थः आकृष्यते तदा सः पतति इव प्रतिभाति। किन्तु अमुं सर्वत आकर्षणशक्तेः समत्वादधः पतनसम्भावना न सम्भवति। कस्यापि आकर्षकपदार्थस्य केन्द्रे आकर्षणशक्तिः सर्वाधिका सामीप्ये अपि अधिका दूरत्वे च अपचीयमाना भवति। यथा स्वसिद्धान्तशिरोमणौ भास्कराचार्यः कथयति-

**आकृष्टिशक्तिश्च महीतया यत्**
**खस्थं गुरुं स्वाभिमुखं स्वशक्त्या।**
**आकृष्यते तत् पततीव भाति,**
**समे समन्तात् क्व पतत्वियं खे।**

-सि०शि०गो० भुवनकोशः श्लो०६

अयं श्लोकः प्रमाणयति यद् भास्कराचार्येण न्यूटनात् पूर्वम् एव आकर्षणशक्तेः पुष्टम् मतं स्थापितम् कृतमासीत्। तत् पश्चात् एव न्यूटनमहोदयेन आकर्षणशक्तेः सिद्धान्तः स्थापितः कृतः। न्यूटनमहोदयस्य मतमस्ति यत् प्रत्येकमणुः प्रत्यणुमाकर्षति। अतः यस्मिन् पदार्थे अणुसमष्टिः अधिका तत्र आकर्षणशक्तेः अपि आधिक्यम् वर्तते। यत्र अणुसमष्टिः अल्पा तत्र आकर्षणशक्तेः अल्पत्वं भवति। सूर्ये अणूनां समष्टिः सर्वाधिका वर्तते अतः तत्र आकर्षणशक्तिः अपि सर्वाधिकाविद्यते। सर्वे ग्रहाः सूर्यस्याकर्षणमार्गे आगच्छन्तः सूर्यं परितः परिक्रमन्तः दृश्यन्ते। अत्र शंका उत्पद्यते यत् केषु अपि पदार्थेषु यो अणुः विशिष्टः भवति सः अन्योऽन्यं पदार्थं स्ववशीभूतं करोति। सूर्यः स्वकीयाकर्षणशक्तया ग्रहान् स्वाभिमुखमाकर्षति तथैव भूः आदयः सर्वे ग्रहाः अपि स्वकीया-आकर्षणशक्तया स्वाकर्षणमार्गस्थितान् पदार्थान् उपग्रहान् च आकर्षयन्ति। सूर्यं परितः ये भ्रमन्ति ते ग्रहाः तथा ग्रहं परितः ये भ्रमन्ति ते उपग्रहाः (चन्द्राः) भवन्ति। यथा अस्माकं चन्द्रः पृथिवीं परितः भ्रमति। अतः भूमौ अन्येषु ग्रहेषु च आकर्षणशक्तिः सिध्यति। प्राचीनाचार्यैः भूमेः स्थितिः ब्रह्माण्डमध्ये स्वीकरणात्भूकेन्द्रोऽभिप्रायिकः कक्षाक्रमः प्रतिपादितः। ख्रिताब्दीयपञ्चम्यां शताब्द्याम् आर्यभट्टेन भूमेः चलत्वं कथितम्। सः तावत् प्राचीनतमे काले एकं वैज्ञानिकम् उदाहरणम् इदम् उपस्थापितवान् यत् यथा नौकायां स्थितः पुरुषः तटीयाचलपदार्थान् विपरीतदिशि गच्छन्तम् पश्यति तथा एव चलायमानभूमौ स्थितः मानवः अपि अचलानि भानि (नक्षत्राणि) पश्चिमगानि पश्यति। आर्यभट्टन तदैव हि प्रतिपादितम् आधुनिकवैज्ञानिकानामिदं मतम्-

**अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं मद्वत्।**
**अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम् ॥**

- अ०भा०गी०पा० श्लो०७।

भूमेः मध्यभागे भूमध्यरेखा पूर्वापरा भवति। भूमध्यरेखायाः अपरसंज्ञा विषुवत् रेखा अपि अस्ति। इयम् भूमध्यरेखायाः भूगोलं गोलार्धद्वये विभाजयति। भूमध्यरेखातः उत्तरध्रुवम् यावत् उत्तरगोलार्धं तथा च भूमध्यरेखातः दक्षिणध्रुवं यावत् दक्षिणगोलार्धं भवति। उत्तरध्रुवस्य प्राचीननाम सुमेरुः अस्ति। सम्प्रति व्यवहारे उत्तर-दक्षिणगोलेन अपि ज्ञायते। भूमध्यरेखातः सुमेरुपर्यन्तमुत्तरगोले उत्तरीयाक्षांशाः नवत्यंशमिता उत्तरे निरन्तरं प्रवर्द्धन्ते। एवमेव भूमध्यरेखातः दक्षिणगोले दक्षिणांशाः नवत्यंशमिताः सुमेरुपर्यप्तं स्थिताः सन्ति ते दक्षिणे निरन्तरं प्रवर्द्धन्ते। विषुवत् रेखा भूमध्यरेखा वा शून्याक्षांशस्य द्योतिका भवति। शून्याक्षांशस्थित- देशेषु सर्वदा दिनरात्रिमानं समानं भवति। तत्र त्रिंशत् घट्यात्मकं दिनम् त्रिंशद्घट्यात्मिका च रात्रिः भवति। अस्याभिप्रायः भवति यद् द्वादशहोरात्मकं दिनं द्वादशहोरात्मिका रात्रिः भवति। शून्य-अक्षांशदेशेषु एतादृशी स्थितिः भवति। परन्तु साक्षदेशेषु दिनरात्रिमानं सदा एकरूपं न भवति। तत्र गोलभेदेन अक्षांशभेदेन च प्रत्यहं सूर्यस्य स्थितिभिन्नत्वात् दिनरात्रिमानयोः ह्रासवृद्धी भवतः।

शून्याक्षांशोत्तरदेशेषु अर्थात् साक्षदेशेषु वर्षाभ्यन्तरे केवलम् द्विवारम् दिनरात्रिमाने तुल्ये भवतः। यदि सूर्यः सामनमषादौ (मार्चमासस्यैकविंशतितारिकायाम्) सामतुल्यादौ (सितम्बरमासस्य त्रयोविंशतितारिका-याम्) स्थितः स्यात् तदा द्वादशहोरात्मकम् दिनम् द्वादशहोरात्मिका रात्रिश्च भवति। भूमध्यरेखा गोलविभाजकरेखा अस्ति। तत्र स्थितस्य जनस्य कृते उत्तरीध्रुवस्य दक्षिणीध्रुवस्य च दर्शनम् क्षितिजे भवति। ततः (भूमध्यरेखातः) उत्तरदिशि गमनेन उत्तरीयध्रुवस्योन्नतिः गणैः वर्द्धते। एवमेव दक्षिणदिशि गमनेन दक्षिणध्रुवस्योन्नतिः दक्षिणाक्षांशाः। अतः आचार्ये एवोक्तम् **"ध्रुवताराया: यावती उन्नतिः तावन्तोऽक्षांशाः''।** प्रतिदिनम् उत्तरगोले उत्तरध्रुवस्य दक्षिणगोले च दक्षिणध्रुवस्य दर्शनं भवति। भूमध्यरेखा पूर्वापरा भवति शून्यतः भवति अंशान् प्रति समा अक्षांशरेखा पूर्वापरा भवन्ति। भूगोले उत्तरध्रुवतः दक्षिणध्रुवं प्रति या रेखाः गच्छति सायाम्योत्तररेखानाम्याः प्रसिद्धा अस्ति। अंशात्मकमानेन गोले ३६० रेखाः याम्योत्तररेखाः भवन्ति। याम्योत्तररेखा एव अतः मात्र रेखाशब्देन ज्ञायते। अंशात्मकमानस्य प्रयोगे रेखांशस्यप्रयोगः मिलति। प्राचीनज्योतिर्विद्भिः देशान्तरस्य वा ज्ञानं रेखादेशस्याधारेण कृतम्। भास्कराचार्येण रेखादेशस्थितपुराणां ज्ञानम् विधाय तदाधारेण देशान्तरस्य रेखान्तरस्य ज्ञानं विहितम्।

**यल्लङ्कोज्जयिनी पुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत्।**
**सूत्र मेरुगतं बुधैर्विमदिता सा मध्यरेखा भुवः॥**

-सिद्धान्तशिरोमणिः

इत्थमत्र तेषां स्पष्टमभिप्रायो वर्तते यद् या रेखा लङ्का-उज्जयिनी-कुरुक्षेत्रादिदेशान् स्पृशन्ती उत्तरदक्षिणध्रुवद्वयम् प्रति गता भवति, तस्य एव मध्यरेखा नाम आचार्यैः कथितम्। तद्गतदेश्च रेखादेशः कथितः। अनेन प्रकारेण रेखादेश स्वदेशयोः पूर्वापरान्तरं रेखान्तरं देशान्तरं वा भवति। वर्तमाने रेखादेश-इंग्लैण्डदेशस्य ग्रीनविचस्थानमस्ति। इतः देशान्तरस्य रेखान्तरस्य गणना सम्प्रति प्रारभ्यते। आर्यभट्टेन सम्यक्तया रेखान्तरस्य ज्ञानम् विहितम्। आर्यभट्टस्य मतम् वर्तते यत् -प्राणेनैककलाम् भूः अर्थात् भूमिः प्राणकालेन एककलाम् गच्छति। इत्थमेव वारक्रमस्यापि विषये संस्कृतसाहित्यदृष्ट्या वैज्ञानिकचिन्तनमाव-

श्यकम्। रविवारतः आरभ्य शनिवारपर्यन्तम् सप्तवासराः भवन्ति। ते सप्तवासराः भवन्ति-रविवासरः, सोमवासरः, भौमवासरः, बुधवासरः, गुरुवासरः, शुक्रवासरः, शनिवासरश्च। वाराणां यः क्रमः समग्रे विश्वे सम्प्रति प्रचलति सः क्रमः भारतदेशस्य योगदानम् अस्ति। अस्य अभिप्रायोऽस्ति यत् वारस्य प्रथमः अन्वेषकः भारतदेशः। भुवः सापेक्षत्वात् भूकेन्द्राभिप्रायेण भारतीयमनीषिभिः ग्रहाणां कक्षाक्रमः निर्धारितः कृतः। यत्र वयं वसामः, सा भूमिः सर्वेषां ग्रहाणाम् मध्ये सापेक्षत्वेन स्थिता वर्तते।

**संस्कृतशास्त्रेषु विज्ञानतत्त्वानि**

भूकेन्द्राभिप्रायेण सर्वे सूर्यादिग्रहाः स्वस्वकक्षासु परिभ्रमन्ति। भूमेर्पिण्डस्योपरि क्रमशः उपर्युपरि चन्द्र-बुध-शुक्र-सूर्य-भौम-गुरु-शनैश्चराणां कक्षाः सन्ति। पृथिव्याः समीपे यस्य ग्रहस्य कक्षा भवति सः भुवं परितः शीघ्रगत्या स्वमार्गं प्रपूरयति। यस्य ग्रहस्य कक्षा सुदूरे भवति सः ग्रहः विलम्बेन स्वमार्गं प्रपूरयति। तीव्रगामी ग्रहः चन्द्रः तथा च सर्वाधिकः मन्दगतिकः ग्रहः मन्दः (शनिः) भवति। पृथिवी षष्टि-घट्यात्मके काले चतुर्विंशतिहोरासु वा स्वकक्षोपरि एकम् चक्रम् प्रपूरयति। स्वकक्षोपरि भुवः एकं चक्रं एकं दिनम् भवति । सापेक्षत्वात् अस्याभिप्रायो भवति यत् सूर्योदयात् सूर्योदयं यावत् दिनं भवति। द्वयोः सूर्योदययोर्मध्ये चतुर्विंशतिहोरात्मकः कालः भवति। सृष्ट्यादौ प्रथमः वारः सूर्यवारः एव आसीत्। यथा सूर्यसिद्धान्ते लिखितम् वर्तते -**'लङ्कानगर्यामुदयाच्चभानोस्तस्यैव वारः प्रथमः बभूव'।** सूर्योदयकाले यस्य ग्रहस्य होरा भवति व्यवहारे तस्य नाम्ना एव सम्पूर्णदिवसस्य नाम भवति परन्तु वास्तविकरूपेण सूर्योदये यस्य ग्रहस्य होरा भवति ततः होरानन्तरम् तस्मात् शीघ्रगतिकग्रहस्य होरा भवति। अनेन प्रकारेण अग्रे भवति। शनिग्रहः मन्दगतिकः ग्रहोऽस्ति शनितः शीघ्रगतिकः सूर्यः, सूर्यात् शीघ्रगतिकः शुक्रः, शुक्रतः शीघ्रगतिकः बुधः, बुधतः शीघ्रगतिकः चन्द्रः भवति। यथा-सृष्ट्यादौ सूर्योदये सूर्यवारः आसीत् ततः होरानन्तरम् शुक्रस्य, ततः होरानन्तरं बुधस्य, ततः होरानन्तरम् गुरोः, ततः होरानन्तरम् चन्द्रस्य, ततः होरानन्तरम् चक्रक्रमे शनेः ततः होरानन्तरं गुरोः, ततः होरानन्तरम् भौमस्य वारान्तरम्। अनेन प्रकारेण चतुर्विंशतिहोरा यावत् वारान्तरम् भवति। अनेन वाराणाम् अन्तरस्य आवृत्तिर्भवति। त्रि-आवृत्ती एकविंशतिः होराः भवन्ति। अनेन सूर्योदये यस्य ग्रहस्य होरा भवति शीघ्रगतिकक्रमेण ततः चतुर्थः ग्रहः दिवसस्याधिपतिः भवति। यथा सृष्ट्यादौ प्रथमदिवसे सूर्यवारः आसीत् ततः शीघ्रगतिकक्रमेण चतुर्थग्रहः चन्द्रो भवति। अतः सूर्यवारानन्तरम् चन्द्रवासरः भवति। इत्थं सर्वेषां विज्ञानविषयाणां प्रतिपादनं संस्कृतशास्त्रेषु विद्यते। विज्ञानदृष्ट्या तेषामनुसन्धानस्याध्ययनस्य चावश्यकता विद्यते। साम्प्रतं यदि यत्रकुत्रापि एतादृगनुसन्धानं भवति चेत्तर्हि विश्वसमुदाये तस्य प्रसारस्यापि आवश्यकता विद्यते।

**- निदेशकः**
**डॉ. गोस्वामी गिरधारी लाल शास्त्री**
**प्राच्यविद्या प्रतिष्ठानम्,**
**दिल्ली सर्वकारः**
**झण्डेवालानम्, नवदेहली-०५**